केरलपाठावलिः

# संस्कृतम्

## नवमी कक्ष्या

संस्कृतविद्यालयानां कृते।

KERALA READER

# SANSKRIT

STANDARD

## IX

FOR SANSKRIT SCHOOLS ONLY

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala

2024

ST-317-1-SANSKRIT (O/S)-9

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारतभाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधितरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय-गाथा।
जनगणमंगलदायक जय हे,
भारतभाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे।

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**Prepared by**
State Council of Educational Research and Training (SCERT)
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
Typesetting and Layout: SCERT
First Edition: 2024
Printed at : KBPS, Kakkanad, Kochi-30
Department of General Education, Government of Kerala

प्रियच्छात्राः

नवमकक्ष्यायाः पौरस्त्यभाषापठनार्थं सज्जीकृतमिदं संस्कृतपाठ्यपुस्तकं भवतां पुरतः प्रस्तूयते। कथा, काव्यं, प्रकरणम्, आख्यायिका, शास्त्रम् इत्यादिभिः व्यवहाररूपैः सह वृत्तालङ्कारव्याकरणादिशास्त्राणां च पठनं विभाव्य आसूत्रितं भवतीदं पाठ्यपुस्तकम्।

राष्ट्रीय-कौशल-योग्यता-प्रारूपम् (National Skill Qualification Foundation), सूचन-प्रौद्योगिकोपाधयश्च (ICT) पाठ्यपुस्तकेऽस्मिन् परिगणिताः सन्ति।

स्वतन्त्रवाचनाय, स्वतन्त्रचिन्तायै, सर्गाविष्काराय च पुस्तकेऽस्मिन् अवसराः समाकलिताः। भाषायाः प्रयोगरीतीः अवगन्तुं तद्वारा रचनाप्रवर्तनेषु भागभाग्भवितुं च पठनानुभवाः कक्ष्याप्रकोष्ठात् अवाप्तव्याः।

पुस्तकस्यास्य अध्ययनेन संस्कृतस्य विशालं लोकं प्रवेष्टुं प्रेरणा नूनं भविष्यतीति आशासे।

भवदीयः

डाः जयप्रकाश् आर्. के
निदेशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

## TEXTBOOK DEVELOPMENT COMMITTEE
## SANSKRIT IX-ORIENTAL SCHOOLS

**Advisor**

V. Madhavan Pillai , Associate Professor in Sanskrit ( Rtd)

**Chairperson**

Dr. Anand Dilip Raj, Associate Professor in Sanskrit ( Rtd)

**Expert**

Dr. T. Keralasreemathi, Senior Research Officer, Sanskrit, SCERT ( Rtd)

**Participants**

Arundhathy Varma. N K, HST Sanskrit, H S S Peringode, Palakkad

Kesavankutty. A , HSST Sanskrit (Rtd),Govt.Girls H S S Pattom,Trivandrum

Lekha.K, HST, SNVSHS Thrikkaruva, Kollam

Reshmi G Pillai, HST, KV Sanskrit H S S, Muthukulam, Alappuzha

Dr.Sabarees.M, HST Sanskrit, HSS Mundur, Palakkad.

Sajikumar A V, HSST Jr, Sanskrit, GHSS East Hill, Kozhikkode

Dr.Sarath Mithran , HST Sanskrit, M AM H S Koratty, Thrissur.

Vidhya Lakshmi.M, HST, Sanskrit, G B H S S Tirur, Malappuram

Abhijith Krishna R S , Diamond Jubilee Fellowship artist (Sculpture)
Directorate of Culture, Trivandrum.

**ACADEMIC CO-ORDINATOR**

Deepa N Kumar

Research Officer (Hindi) SCERT, Kerala.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING , KERALA

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| १ साहितीलयः | १ | जागरूको भव। | कथा। | ८ |
| | २ | वसन्तागमः। | काव्यम्। | २१ |
| २ भावदीप्तिः | ३ | सुवर्णशाकटिकम्। | प्रकरणम्। | ३६ |
| | ४ | काव्यामृतम्। | काव्यम्। | ५१ |
| ३ रामणीयकम् | ५ | शोणनदवर्णनम्। | आख्यायिका। | ६८ |
| | ६ | चमत्कृतिः। | शास्त्रम्। | ८० |


## पठनप्रवर्तनानां सूचकानि।



# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

**ഭാരതത്തിലെ ജനങ്ങളായ നാം** ഭാരതത്തെ ഒരു [1]**[പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി]** സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ **നീതിയും**;

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള **സ്വാതന്ത്ര്യവും**;

പദവിയിലും അവസരത്തിലും **സമത്വവും**; സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് **സാഹോദര്യം** പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

**നമ്മുടെ ഭരണഘടനാനിർമ്മാണസഭയിൽ** ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം **ഇതിനാൽ ഈ ഭരണഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കുതന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.**

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക്" എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം" എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

# एककम् १

# साहितीलयः



## आमुखम्

सर्वेऽपि प्राणिनः स्वजीवने विविधाः समस्याः अभिमुखीकुर्वन्ति। तासां समस्यानां परिहारान् ये कुर्वन्ति ते जीवितविजयं प्राप्नुवन्ति। तत्प्रतिपादिका **'जागरूको भव'** इति कथा, तथा मधुमासवर्णनात्मकः **'वसन्तागमः'** इति काव्यांशः च अस्मिन्नेकके सङ्कलितः।



## पाठः-१

# जागरूको भव।

**पाठप्रवेशः**

(कस्मिंश्चित् दुरिताश्वासशिबिरे प्रवृत्तः सम्भाषणांशः।)

मातामही - पुत्रक! अत्र तिष्ठतु।

बालकः - अम्बा कुत्र?

मातामही - सा बषीरस्य मात्रा सह आतुरालयं गता। पश्यतु पुत्र! अधुना वयं सुरक्षिताः खलु। यदि अस्माभिः साकम् आगताः तर्हि ते अपि सुरक्षिताः भवेयुः।

बालकः - आम्, सत्यमेव।

मातामही - ‘ दीर्घसूत्री विनश्यति ‘ इति श्रुतं किल ?

बालकः - दीर्घसूत्री वा? सः कः?

मातामही - सः एकः मत्स्यः। तस्य कथा महाभारतस्य शान्तिपर्वणि वर्तते।

बालकः - कथा वा? कथयतु मातामहि!

मातामही - अस्तु, कथयामि।

## आमुखम्

संस्कृतसाहित्ये अतिविशिष्टं स्थानमावहति कथासाहित्यम्। जीवने प्रेरणादायिकाः भवन्ति कथाः। तादृशानां कथानां समाहारभूतः ग्रन्थः भवति महाभारतम्। महाभारतस्य शान्तिपर्वणि युधिष्ठिरं प्रति भीष्माभिहिता कथा अत्र पाठभागत्वेन स्वीकृता।

**क**स्मिंश्चित् प्रभूतमत्स्ये जलाशये अनागतविधाता, प्रत्युत्पन्नमतिः, दीर्घसूत्री चेति त्रयः सहचारिणः मत्स्याः बभूवुः। तं जलाधारम् अवलोक्य कदाचित् तत्र आगताः जालिकाः परस्परमवदन्। ' अस्मिन् जलस्थाये बहवः मीनाः सन्ति। श्वः प्रभाते आगत्य जलाशयात् सलिलं निस्राव्य मत्स्यान् गृह्णीमः ' इति।

श्रुत्वैतत् अनागतविधाता अकथयत्। ' भो मित्रे! श्वः विभाते ते कैवर्ताः नूनमेव अत्र आगमिष्यन्ति। अस्मान् जाले बद्ध्वा नेष्यन्ति च। अतः शीघ्रम् अन्यत्र गच्छामः' इति। तथा प्रत्युत्पन्नमतिः एवमब्रवीत् ' हे सुहृदौ ! गन्तुं न इच्छाम्यहम्। समयानुरूपं कार्यं करोमि ' इति। दीर्घसूत्री तु - ' तेन किं प्रयोजनम् ? यत् भविष्यति तत् भवतु ' इत्युक्त्वा तत्रैवावर्तत। विलम्बं विना अनागतविधाता स्रोतसा गम्भीरम् अन्यं जलाशयं जगाम।



अन्येद्युः प्रभाते जालिकाः तटाकमागत्य जालं प्रसार्य झषान् अगृह्णन्। ततः यदा कैवर्तः विपुले जलाशये मत्स्यान् प्रक्षालयितुम् आरब्धः तदा मृत इव वर्तमानः प्रत्युत्पन्नमतिः जले अकूर्दत, जलाभ्यन्तरं प्राविशत् च। दीर्घसूत्री तु जाले बद्धः। कैवर्तैः स्वगृहं नीतः च अभवत्।

तदेवोक्तम् - अनागतविधाता च प्रत्युत्पन्नमतिश्च यः।
द्वावेव सुखमेधेते दीर्घसूत्री विनश्यति ।। इति



## पदच्छेदः।

| | | |
|---|---|---|
| चेति | - | च + इति। |
| श्रुत्वैतत् | - | श्रुत्वा + एतत्। |
| इच्छाम्यहम् | - | इच्छामि + अहम्। |
| इत्युक्त्वा | - | इति + उक्त्वा। |
| तत्रैवावर्तत | - | तत्र + एव + अवर्तत। |
| मृत इव | - | मृतः + इव। |
| तदेवोक्तम् | - | तत् + एव + उक्तम्। |
| प्रत्युत्पन्नमतिश्च | - | प्रत्युत्पन्नमतिः + च। |

## विग्रहः।

| | | |
|---|---|---|
| जागरूकः | - | जागर्ति इति । |
| अनागतविधाता | - | न आगतम् अनागतम्, अनागतस्य विधाता। |

| | | |
|---|---|---|
| प्रत्युत्पन्नमतिः | - | प्रत्युत्पन्ना मतिः यस्य सः। |
| दीर्घसूत्री | - | दीर्घसूत्रम् (बहुकालं व्याप्य कर्मारम्भः) अस्ति अस्य इति। |
| समयानुरूपम् | - | रूपस्य योग्यम् अनुरूपम्। समयस्य अनुरूपं समयानुरूपम्। |

## धातुपरिचयः।

| | | |
|---|---|---|
| अवदन् | - | वद्(व्यक्तायां वाचि) धातुः -प.प-लङ्- प्र पु-ब व। |
| अकथयत् | - | कथ् ( वाक्यप्रबन्धे ) धातुः -प.प -लङ्-प्र पु-ए व। |
| गच्छामः | - | गम् (गम्लृ गतौ) धातुः -प.प -लट्-उ पु -ब व। |
| जगाम | - | गम् (गम्लृ गतौ) धातुः - प.प -लिट्-प्र पु -ए व। |
| अगृह्णन् | - | ग्रह् (उपादाने) धातुः - प.प- लङ्-प्र पु- ब व। |
| अब्रवीत् | - | ब्रूञ् ( व्यक्तायां वाचि ) धातुः -प.प -लङ् -प्र पु -ए व। |
| अकूर्दत | - | कूर्द् (क्रीडायां) धातुः -आ.प-लङ्-प्र पु - ए व। |

# व्याकरणकार्यम् ।

## अच् सन्धिः।

01 **चेति - च + इति।**

अत्र च इत्यस्य अन्त्यस्य अकारस्य, इति इत्यस्य आद्यस्य इकारस्य च स्थाने एको गुणः (**एकारः**)आदेशः स्यात्। एवं ‘ चेति ‘ इति रूपम्।

आद्गुणः ६/१/८७

अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात्।

**टिप्पणिः - अ ए ओ एते गुणसंज्ञकाः।**

**यथा :-**

मम + इति - ममेति।

तत्र + उचितम्  -तत्रोचितम्।

गङ्गा + उदकम् - गङ्गोदकम्।

एवम् उपेन्द्रमहेन्द्ररमेशादयः।

02 **श्रुत्वैतत् = श्रुत्वा + एतत्।**

अत्र श्रुत्वा इत्यस्य अन्त्यस्य आकारस्य, एतत् इत्यस्य आद्यस्य एकारस्य च स्थाने ऐकारैकादेशः स्यात् । एवं ' श्रुत्वैतत् ' इति रूपम्।

**वृद्धिरेचि ६/१/८८**
**अवर्णादेचि परे वृद्धिरेकादेशः स्यात्।**

**टिप्पणिः- आ ऐ औ एते वृद्धिसंज्ञकाः।**

**यथा :-** तत्र + एव - तत्रैव।

वन + ओषधिः - वनौषधिः।

एवम् एकैकं तथैव ममैवेत्यादयः।

**इच्छाम्यहम् - इच्छामि + अहम्।**

03 अत्र इच्छामि इत्यस्य अन्त्यस्य इकारस्य अहम् इत्यस्य अकारे परे यकारादेशः स्यात्। अतः 'इच्छाम्यहम्' इति रूपम्।

**इको यणचि ६/१/७७**
**इकः स्थाने यण् स्यादचि संहितायां विषये।**

टिप्पणिः- इक्- इ उ ऋ ऌ। यण्- य् व् र् ल्। अचि - अच् परे (अचः स्वराक्षराणि)

**यथा :-** इति +आदि - इत्यादि।

ननु + अत्र - नन्वत्र।

पितृ + आज्ञा - पित्राज्ञा।

एवं गच्छत्ययं, लिखत्यसौ, इत्यादयः।

04 **द्वावेव = द्वौ + एव।**

अत्र द्वौ इत्यस्य औकारस्य एकारे परे आव् आदेशः स्यात्। अतः ' द्वावेव ' इति रूपम्।

एचोऽयवायावः ६/१/७८
एचः क्रमात् अय् अव् आय् आव् एते स्युरचि।

टिप्पणिः- एच् - ए, ओ , ऐ, औ ।

**यथा :-** हरे+ ए - हरये।
तौ + एव - तावेव।

एवं रामावपि, सगुणावपि, वागर्थाविव इत्यादयः।

05 **तत्रैव + अवर्तत - तत्रैवावर्तत।**

अत्र तत्रैव इत्यस्य अकारस्य अवर्तत इत्यस्य अकारस्य च स्थाने दीर्घः एकादेशः स्यात्। अतः ' तत्रैवावर्तत ' इति रूपम्।

अकः सवर्णे दीर्घः ६।१।१०१
अकः सवर्णेऽचि परे पूर्वपरयोः दीर्घः एकादेशः स्यात्।

**यथा:-** दैत्य + अरिः - दैत्यारिः।
श्री + ईशः - श्रीशः।
गुरु+ उपदेशः - गुरूपदेशः।

एवं दण्डाग्रं, विद्यालयः, शिवालयश्चेत्यादयः।

06 **स्वप्नेऽपि - स्वप्ने + अपि।**
**गुरोऽव - गुरो + अव।**

एङः पदान्तादति ६।१।१०९
पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्।

टिप्पणिः- एङ् - ए ओ ।

**यथा:-** हरेऽव - हरे + अव ।
विष्णोऽव - विष्णो + अव ।

# पठनप्रवर्तनानि ।



**काक्वनुसारं भावानुसारं च कथाम् अवतारयतु। शब्दमुद्रणं कृत्वा पुनः श्रृणोतु।**

श्रद्धेयाः अंशाः-

कथाकथनपरिचायनम्।

अवतारणम्।

पुनःश्रवणम्।



**समानपदानि चित्वा पट्टिकां पूरयतु।**

| पदम् | समानपदानि |
|---|---|
| मत्स्यः | झषः, मीनः |
| मित्रम् | |
| कैवर्तः | |
| जलाशयः | |

**श्रद्धेयौ अंशौ**

पाठभागस्य/कोशस्य/शकुलोपाख्यानस्य च वाचनम्।

उचितपदानां चयनम्।



**समानसंश्लिष्टपदानि पाठात् पाठान्तरेभ्यश्च चित्वा सम्पुटमेकं निर्मातु।**

**श्रद्धेयाः अंशाः-**

चयनसामर्थ्यम्।

विवेचनसामर्थ्यम्।

सम्पुटनिर्माणम्।



**कथानुसारं कथास्तम्भान् क्रमीकरोतु।**

- प्रत्युत्पन्नमतिः मृत इव अतिष्ठत्।
- दीर्घसूत्री तु जाले बद्धः।

- समयानुरूपं कार्यं करोमि इति सः अवदत्।
- प्रभाते जालिकाः तटाकं गत्वा जालं प्रसार्य झषान् अगृह्णन्।
- अनागतविधाता स्रोतसा गम्भीरम् अन्यं जलाशयं जगाम।



**अधोनिर्दिष्टेषु एकम् ऐच्छिकरूपेण स्वीकरोतु ।**

**क)** सचित्रकथानिर्माणम्।

**श्रद्धेयाः अंशाः -**

उचितचित्रचयनम्।

संभाषणलेखनम्।

क्रमीकरणम्।

**ख)** वीडियोसञ्चयः।

**श्रद्धेयः अंशः-**

समानाशयकथायाः चयनम्।

**ग)** कथासम्पुटनिर्माणम्।

**श्रद्धेयाः अंशाः -**

कथासञ्चयनाय निर्देशः।

उचितानां कथानां सञ्चयनम्।

कक्ष्यायाम् अवतारणं सम्पुटनिर्माणं च।



**अनुबन्धं पठित्वा कथान्त्यं विस्तारयतु ।**

**श्रद्धेयाः अंशाः -**

पाठभागस्य सम्यक् वाचनम्।

अनुबन्धे दत्तस्य शकुलोपाख्यानस्य पठनम्।

कथायाः विस्तारः।



**सूत्रार्थमुक्त्वा उदाहरणानि लिखतु।**

**आद्गुणः।** **वृद्धिरेचि।** **इको यणचि।**

**एचोऽयवायावः।** **अकः सवर्णे दीर्घः।** **एङः पदान्तादति।**

**श्रद्धेयौ अंशौ**

सूत्रवृत्तिलेखनम्।

उदाहरणानां लेखनम्।



**HB साहाय्येन कक्ष्यायां चर्चित्वा सूत्रार्थविचारस्पर्धां प्रचालयतु, टिप्पणीं च लिखतु।**

**सूत्राणि**

अ) उरण् रपरः। आ) अन्तादिवच्च ।

इ) ओमाङोश्च । ई) ईदूदेद्विवचनं प्रगृह्यम्।

उ) प्लुतप्रगृह्या अचि नित्यम्। ऊ) अदसो मात्।

**श्रद्धेयाः अंशाः -**

निर्दिष्टभागानां वाचनम् अवधारणं च।

संघे स्थित्वा सूत्रविचारस्पर्धा ।

टिप्पणीलेखनम्।

## अनुबन्धः।

**अमरकोशः। -**

मत्स्यः - पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः।।

कैवर्तः - कैवर्ते दाशधीवरौ (जालिकः)।।

जलाशयः - जलाशयो जलाधारस्तत्रागाधजलो ह्रदः।
आहावस्तु निपानं स्यादुपकूपजलाशये ।।

मित्रम् - वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत्।

जालम् - आनाय पुंसि जालं स्याच्छणसूत्रं पवित्रकम् ।
मत्स्याधानी कुवेणी स्याद्बडिशं मत्स्यवेधनम्।।

## क्रियापदपरिचयः।

### ग्रह् धातोः लङ् लकारः (अनद्यतनभूते)

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | अगृह्णात् | अगृह्णीताम् | अगृह्णन् |
| म.पु | अगृह्णाः | अगृह्णीतम् | अगृह्णीत |
| उ.पु | अगृह्णाम् | अगृह्णीव | अगृह्णीम। |

### आङ् उपसर्गपूर्वकस्य गम्लृ - गतौ धातोः लृट् लकारः (सामान्यभविष्यत्काले)

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | आगमिष्यति | आगमिष्यतः | आगमिष्यन्ति |
| म.पु | आगमिष्यसि | आगमिष्यथः | आगमिष्यथ |
| उ.पु | आगमिष्यामि | आगमिष्यावः | आगमिष्यामः। |

### एध - वृद्धौ (आत्मनेपदी) धातोः लट् लकारः(वर्तमानकालः)

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | एधते | एधेते | एधन्ते |
| म.पु | एधसे | एधेथे | एधध्वे |
| उ.पु | एधे | एधावहे | एधामहे। |

## महाभारतस्य पर्वणां नामानि।

आदि - सभा - वन - विराट - उद्योग - भीष्म - द्रोण - कर्ण - शल्य - - सौप्तिक - स्त्री - शान्ति - अनुशासन - अश्वमेधिक - आश्रमवासिक - - मौसल - महाप्रस्थानिक - स्वर्गारोहण पर्वाणि।

## शकुलोपाख्यानम्।

महाभारते शान्तिपर्वणि विद्यमाना मत्स्यत्रयकथा (श्लोकाः)।

(सप्तत्रिंशदधिकशततमोऽध्यायः। )

अनागतविधाता च प्रत्युत्पन्नमतिश्च यः।
द्वावेव सुखमेधेते दीर्घसूत्री विनश्यति।।

अत्रैव चेदमव्यग्रं श्रुणुष्वाख्यानमुत्तमम्।
दीर्घसूत्रमुपाश्रित्य कार्याकार्यविनिश्चये।।
नातिगाधे जलाधारे सुहृदः कुशलास्त्रयः।
प्रभूतमत्स्ये कौन्तेय! बभूवुः सहचारिणः।।
तत्रैको दीर्घकालज्ञ उत्पन्नप्रतिभोऽपरः।
दीर्घसूत्रश्च तत्रैकस्त्रयाणां सहचारिणाम्।।
कदाचित् तं जलस्थायं मत्स्यबन्धाः समन्ततः।
निस्त्रावयामासुरथो निम्नेषु विविधैर्मुखैः।।
प्रतीक्ष्यमाणं तं दृष्ट्वा जलस्थायं भयागमे।
अब्रवीत् दीर्घदर्शी तु तावुभौ सुहृदौ तदा।।
इयमापत् समुत्पन्ना सर्वेषां सलिलौकसाम्।
शीघ्रमन्यत्र गच्छामः पन्था यावन्न दुष्यति।।
अनागतमनर्थं हि सुनयैर्यः प्रबाधयेत्।
स न संशयमाप्नोति रोचतां भो व्रजामहे।।
दीर्घसूत्रस्तु यस्तत्र सोऽब्रवीत् सम्यगुच्यते।
न तु कार्या त्वरा तावदिति मे निश्चिता मतिः।।
अथ सम्प्रतिपत्तिज्ञः प्राब्रवीत् दीर्घदर्शिनम्।
प्राप्ते काले न मे किञ्चिन्न्यायतः परिहास्यते।।
एवं श्रुत्वा निराक्रम्य दीर्घदर्शी महामतिः।
जगाम स्रोतसा तेन गम्भीरं सलिलाशयम्।।
ततः प्रसृततोयं तं प्रसमीक्ष्य जलाशयम्।
बबन्धुर्विविधैर्योगैर्मत्स्यान् मत्स्योपजीविनः।।
विलोड्यमाने तस्मिंस्तु स्रुततोये जलाशये।
अगच्छद् बन्धनं तत्र दीर्घसूत्रः सहापरैः।।
उद्याने क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः।
प्रविश्यान्तरमेतेषां स्थितः सम्प्रतिपत्तिमान्।।

गृह्यमेव तदुद्यानं गृहीत्वा तं तथैव सः।
सर्वानेव च तांस्तत्र ते विदुर्ग्रथितानिति।।
ततः प्रक्षाल्यमानेषु मत्स्येषु विपुले जले।
मुक्त्वा रज्जुं प्रमुक्तोऽसौ शीघ्रं सम्प्रतिपत्तिमान्।।
दीर्घसूत्रस्तु मन्दात्मा हीनबुद्धिरचेतनः।
मरणं प्राप्तवान् मूढो यथैवोपहतेन्द्रियः।।

## शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | आङ्गलेयम् |
|---|---|---|---|
| अकूर्दत | आप्लवत | പുറത്തേക്ക് ചാടി | Jumped out |
| जलस्थायः | तडागः | തടാകം | Lake |
| जलाधारः | जलाशयः | തടാകം | Lake |
| जालम् | मत्स्याधानी | മീൻവല | Fishingnet |
| जालिकः | कैवर्तः | ധീവരൻ | Fisherman |
| निस्राव्य | प्रवाह्य | ഒഴുക്കിയിട്ട് | Having drained out |
| प्रभूतमत्स्ये | मत्स्यपूर्णे | മത്സ്യങ്ങൾ നിറഞ്ഞ. | Fish-laden |
| सहचारिणः | सहवर्तिनः | കൂട്ടാളികൾ | Companions |
| स्रोतसा | प्रवाहेण | ഒഴുക്കിലൂടെ | Through the flow of water |

# किमधिगतम्।

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगत्यर्थं यत्नः करणीयः |
|---|---|---|---|
| काकनुसारं भावानुसारं च कथाकथनम्। | | | |
| समानार्थपदानां पट्टिकाकरणम्। | | | |
| समानसंश्लिष्टपदानां चयनं सम्पुटनिर्माणं च। | | | |
| कथास्तम्भक्रमीकरणम्। | | | |
| क) सचित्रकथानिर्माणम्। | | | |
| ख) वीडियोसञ्चयः। | | | |
| ग) कथासम्पुटनिर्माणम्। | | | |
| कथाविस्तारः। | | | |
| सूत्रार्थानाम् उदाहरणानां च लेखनम् । | | | |
| सूत्रार्थविचारस्पर्धा, टिप्पणी लेखनं च। | | | |

**कालिदासकविना वर्णितं प्रकृतेः शोभापूर्णं मुखं पश्यामः।**

# पाठः-२ वसन्तागमः।



## पाठप्रवेशः

महाकवेः कुमारनाशान् महोदयस्य पुष्पवाटिका नामकात् कैरलीकवितासमाहारात् उद्धृतः "पूक्कुन्निता मुल्ल पूक्कुन्निलञ्ञी....". इति कवितांशः श्रुतः किल। एकवारमपि शृणुमः।

## आमुखम्

उत्तमकाव्यरचनया नाटकरचनया सन्देशकाव्यरचनया च सहृदयहृदयान्याचकर्ष कविकुलगुरुः कालिदासः। 'अभिज्ञानशाकुन्तलम्' नाम तस्य नाटकं 'नाटकान्तं कवित्वम्' इति प्रथाम् अन्वर्थं करोति। मालविकाग्निमित्रम्, विक्रमोर्वशीयम् चेति नाटकद्वयमपि तेन रचितम्। अनेन रचितः मेघसन्देशः इति सन्देशकाव्यम् अनवद्यसुन्दरं भवति। ऋतुसंहारनामके खण्डकाव्ये षण्णाम् ऋतूनाम् अतिसुन्दरं यत् चित्रणं कविना कृतं तत् नूतनमेकं भावुकत्वं संस्कृतसाहित्ये उद्घाटयामास। ग्रीष्मः, वर्षा, शरत्, हेमन्तः, शिशिरः, वसन्तश्चेति ऋतुषट्कस्य हृदयावर्जकतां कश्चित् कामुकः कामिनीं वर्णयति। ऋतुवर्णनात्मकप्रमेयस्य अस्य काव्यस्य वसन्तवर्णनासन्दर्भात् केचन श्लोकाः पाठेऽस्मिन् स्वीकृताः। वृत्तालङ्कारपरिचयार्थमपि अत्र यत्नः विहितः।

1 आमूलतो विद्रुमरागताम्रं
सपल्लवाः पुष्पचयं दधानाः।
कुर्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम्।।

## पदच्छेदः।

| | | |
|---|---|---|
| कुर्वन्त्यशोका हृदयम् | - | कुर्वन्ति + अशोकाः + हृदयम्। |

## पदार्थः।

| | | |
|---|---|---|
| आमूलतः | - | मूलादारभ्य। |
| विद्रुमः | - | प्रवालः (पविष़म् इति भाषायाम्)। |
| ताम्रम् | - | रक्तवर्णम्। |
| पुष्पचयम् | - | कुसुमनिकरम्। |
| दधानाः | - | धारयन्तः। |
| सपल्लवाः | - | पल्लवसहिताः। |
| सशोकम् | - | शोकसहितम्। |

## विग्रहः।

| | | |
|---|---|---|
| विद्रुमरागताम्रम् | - | विद्रुमस्य रागः विद्रुमरागः, विद्रुमरागः इव ताम्रः विद्रुमरागताम्रः, तम्। |
| पुष्पचयः | - | पुष्पाणां चयः। |
| सशोकम् | - | शोकेन सह वर्तते। |
| नवयौवनानाम् | - | यूनां भावः यौवनम्, नवं यौवनं येषां ते नवयौवनाः, तेषाम्। |

## आकाङ्क्षाप्रश्नाः।

| | | |
|---|---|---|
| अत्र क्रियापदं किम्? | - | कुर्वन्ति। |
| कथं कुर्वन्ति? | - | सशोकं |
| किं सशोकं कुर्वन्ति? | - | हृदयम् |
| केषां हृदयम्? | - | नवयौवनानां |
| किं क्रियमाणाः? | - | निरीक्ष्यमाणाः |
| के? | - | अशोकाः |
| कीदृशाः अशोकाः? | - | सपल्लवाः |
| पुनः कीदृशाः? | - | पुष्पचयं दधानाः |
| कीदृशं पुष्पचयम्? | - | विद्रुमरागताम्रम् |
| कथम्? | - | आमूलतः |

## अन्वयः।

आमूलतः विद्रुमरागताम्रं पुष्पचयं दधानाः सपल्लवाः अशोकाः निरीक्ष्यमाणाः नवयौवनानां हृदयं सशोकं कुर्वन्ति।

## आशयः।

मूलादारभ्य प्रवालस्य राग इव रक्तं कुसुमप्रकरं धारयन्तः पल्लवसहिताः अशोकतरवः (जनैः) दृश्यमानाः नारीणां नृणां च हृदयम् अतिव्याकुलं कुर्वन्ति।

*वृत्तम्- उपजातिः।    अलङ्कारः - अनुप्रासः।*

***इन्द्रवज्रा- स्यादिन्द्रवज्रा यदि तौ जगौ गः।***

प्रतिपादं तगणद्वयं जगणः गुरुद्वयं चेति एकादशवर्णाः यदि स्युः तर्हि इन्द्रवज्रा नाम वृत्तम्।

***उपेन्द्रवज्रा - उपेन्द्रवज्रा जतजास्ततो गौ।***

प्रतिपादं जगण-तगण-जगण-गुरुद्वयं चेति एकादशवर्णाः भवन्ति चेत् तत् वृत्तम् उपेन्द्रवज्रेति कथ्यते।

त | त | ज | गु गु
- - U | - - U | U - U | - -
आमूल|तो विद्रु|मराग|ताम्रं

ज | त | ज | गु गु
U - U | - - U | U - U | - -
सपल्ल|वाः पुष्प|चयं द|धानाः

त | त | ज | गु गु
- - U | - - U | U - U | - -
कुर्वन्त्य|शोका हृ|दयं स|शोकं

ज | त | ज | गु गु
U - U | - - U | U - U | - -
निरीक्ष्य|माणा न|वयौव|नानाम्।।

लघु U

गुरुः -

**वृत्तम्** - उपजातिः।

**लक्षणम्** - अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।

*इन्द्रवज्रा-उपेन्द्रवज्रालक्षणयोः सङ्करः उपजातिः भवति।*

**अलङ्कारः** - अनुप्रासः (शब्दालङ्कारः)

**लक्षणम्** - वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च।

*पादेषु पदेषु च वर्णावृत्तिः अनुप्रासः इत्यन्वयः। स्वरस्य साम्याभावेऽपि व्यञ्जनानां मनोरञ्जकरूपेण पादेषु पदेषु वा आवृत्तिः अभ्यासः अनुप्रासालङ्कारः।*

अत्र तृतीयपादे अशोकं , सशोकम्, इत्यत्र शोकपदस्यावृत्तिः। नवयौवनानां इति पदे 'न' इति वर्णस्यापि आवृत्तिः।अतः अनुप्रासालङ्कारः।

2 मत्तद्विरेफपरिचुम्बितचारुपुष्पाः
मन्दानिलाकुलितनम्रमृदुप्रवालाः।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः।।

## पदच्छेदः।

सहसोत्सुकत्वम् - सहसा + उत्सुकत्वम्।

## पदार्थः ।

| | | |
|---|---|---|
| द्विरेफः | - | भ्रमरः। |
| मन्दानिलः | - | मृदुपवनः। |
| समवेक्ष्यमाणाः | - | परिदृश्यमानाः। |
| बालातिमुक्तलतिकाः | - | अभिनवाः माधवीलताः। (Jasmine creeper) |
| उत्सुकत्वम् | - | तात्पर्यम्/कौतुकम्। |

## विग्रहः।

मत्तद्विरेफः - द्वौ रेफौ यस्य सः द्विरेफः, मत्तः च असौ द्विरेफः च।

(द्वौ रेफौ वाचकशब्दे अस्य इति। द्विरेफयुक्तभ्रमरशब्दवाच्ये इति वाचस्पत्यम्।)

मन्दानिलाकुलितनम्रमृदुप्रवालाः - मन्दः अनिलः मन्दानिलः, तेन आकुलितः मन्दानिलाकुलितः, तेन नम्रः, तादृशाः प्रवालाः। मन्दानिलाकुलितनम्रमृदुप्रवालाः ।

मृदवश्च ते प्रवालाः, मन्दानिलाकुलितनम्राश्च ते मृदुप्रवालाः ।

| | | |
|---|---|---|
| कामिमनसां | - | कामिनां मनांसि कामिमनांसि, तेषाम्। |

## आकाङ्क्षाप्रश्नाः।

| | | |
|---|---|---|
| अस्मिन् श्लोके क्रियापदं किम्? | - | कुर्वन्ति। |
| किं कुर्वन्ति? | - | उत्सुकत्वम् |
| कथम्? | - | सहसा |
| केषाम्? | - | कामिमनसाम् |
| काः कामिमनसां | | |
| सहसोत्सुकत्वं कुर्वन्ति? | - | बालातिमुक्तलतिकाः |
| किं क्रियमाणाः? | - | समवेक्ष्यमाणाः |
| कीदृशाः ? | - | मन्दानिलाकुलितनम्रमृदुप्रवालाः |
| पुनः कीदृशाः? | - | मत्तद्विरेफपरिचुम्बितचारुपुष्पाः |

## अन्वयः।

मत्तद्विरेफपरिचुम्बितचारुपुष्पाः मन्दानिलाकुलितनम्रमृदुप्रवालाः समवेक्ष्यमाणाः बालातिमुक्तलतिकाः कामिमनसां सहसोत्सुकत्वं कुर्वन्ति।

## आशयः।

मत्तैः भ्रमरैः परिचुम्बितमनोज्ञपुष्पैः सहिताः मृदुपवनेन कम्पितकोमलपल्लवाः जनैः परिदृश्यमानाः अभिनवाः माधवीलताः कामिजनहृदयानां सहसा औत्सुक्यं जनयन्ति।

| | | |
|---|---|---|
| **वृत्तम्** | - | वसन्ततिलका। |
| **लक्षणम्** | - | उक्ता वसन्ततिलका तभजा जगौ गः। |

*प्रतिपादं तगणः, भगणः, जगणः, जगणः गुरुद्वयं चेति चतुर्दशवर्णाः भवन्ति चेत् तद्*

*वसन्ततिलका नाम वृत्तं स्यात्। पादान्ते यतिश्च।*

त | भ | ज | ज | गु गु
- - U | - U U | U - U | U - U | - -
मत्तद्वि | रेफप | रिचुम्बि | तचारु | पुष्पाः

3 कान्तामुखद्युतिमुषामचिरोद्गतानां
शोभां परां कुरबकद्रुममञ्जरीणाम्।
दृष्ट्वा प्रिये सहृदयस्य भवेन्न कस्य
कन्दर्पबाणनिकरैर्व्यथितं हि चेतः।।

**पदच्छेदः।**

भवेन्न - भवेत् + न।



## पदार्थः।

| | | |
|---|---|---|
| अचिरोद्गतानां | - | अभिनवोदितानाम्। |
| मुखद्युतिः | - | मुखकान्तिः। |
| कुरबकः | - | सैरेयकः / रक्ताम्लानम् (चेङ्कुरिञ्जी इति भाषायाम्)। |
| द्रुमः | - | वृक्षः। |
| कन्दर्पः | - | कामदेवः। |
| चेतः | - | चित्तम्। |
| व्यथितम् | - | विद्धम्। |

## विग्रहः।

| | | |
|---|---|---|
| कान्तामुखद्युतिमुषाम् | - | कान्तायाः मुखस्य द्युतिं मुष्णाति (अपहरति) इति कान्तामुखद्युतिमुट्, तासाम्। |
| सहृदयः | - | समानं हृदयं यस्य सः। |

## आकाङ्क्षाप्रश्नाः।

| | | |
|---|---|---|
| अत्र क्रियापदं किम्? | - | भवेत्। |
| कथं न भवेत्? | - | व्यथितं न |
| कैः व्यथितं न भवेत्? | - | कन्दर्पबाणनिकरैः |
| किम् ? | - | चेतः |
| कीदृशस्य? | - | सहृदयस्य कस्य |
| किं दृष्ट्वा? | - | परां शोभां दृष्ट्वा |
| कासां शोभाम्? | - | कुरबकद्रुममञ्जरीणां |
| कीदृशानां मञ्जरीणाम्? | - | कान्तामुखद्युतिमुषां |

पुन: कीदृशानाम् ? - अचिरोद्गतानां

कथं सम्बोधयति? - हे प्रिये!(इति)

**अन्वय:।**

हे प्रिये! अचिरोद्गतानां कान्तामुखद्युतिमुषां कुरबकद्रुममञ्जरीणां परां शोभां दृष्ट्वा सहृदयस्य कस्य चेत: कन्दर्पबाणनिकरै: व्यथितं न भवेत् ?

**आशय:।**

हे कामिनि! सद्य: अङ्कुरितानां कान्ताया: मुखकान्तिम् अपहरतां सैरेयकवृक्षाणां मञ्जरीणाम् अतीव सौन्दर्यं दृष्ट्वा सचेतस: कस्य जनस्य मन: कामशरसमूहै: विद्धं न भवेत् ? [**वृत्तम् -** वसन्ततिलका।]

4 आदीप्तवह्निसदृशैरपयातपत्रै:
सर्वत्र किंशुकवनै: कुसुमावकीर्णै:।
सद्यो वसन्तसमये समुपागते हि
रक्तांशुका नववधूरिव भाति भूमि:।।



## पदच्छेदः।

| | | |
|---|---|---|
| आदीप्तवह्निसदृशैरपयातपत्रैः | - | आदीप्तवह्निसदृशैः+ अपयातपत्रैः। |
| सद्यो वसन्तसमये | - | सद्यः + वसन्तसमये। |
| नववधूरिव | - | नववधूः + इव। |

## पदार्थः।

| | | |
|---|---|---|
| समुपागते | - | सम्प्राप्ते। |
| सद्यः | - | झटिति। |
| आदीप्तः | - | प्रज्वलितः। |
| वह्निः | - | अग्निः। |
| अपयातैः | - | निर्गलितैः। |
| पत्रैः | - | पर्णैः। |
| कुसुमावकीर्णः | - | पुष्पभरनतः। |
| किंशुकवनम् | - | पलाशवनम्। |
| रक्तांशुका | - | रक्तवर्णवसना। |
| नववधूः | - | नवोढा। |

## विग्रहः।

| | | |
|---|---|---|
| कुसुमावकीर्णैः | - | कुसुमैः अवकीर्णः,कुसुमावकीर्णः,तैः। |
| रक्तांशुका | - | रक्तं च तदंशुकं च रक्तांशुकं,तत् वसनं यस्याः सा |
| नववधूः | - | नवा च असौ वधूः च। |

## आकाङ्क्षाप्रश्नाः।

| | | |
|---|---|---|
| अत्र क्रियापदम् | - | भाति। |

| | | |
|---|---|---|
| का इव भाति? | - | नववधू: इव |
| कीदृशी नववधूरिव? | - | रक्तांशुका |
| कै: ? | - | किंशुकवनै: |
| कुत्र ? | - | सर्वत्र |
| कीदृशै: ? | - | कुसुमावकीर्णै: |
| पुन: कीदृशै:? | - | अपयातपत्रै: |
| केन सदृशै:? | - | आदीप्तवह्निसदृशै: |
| कदा ? | - | सद्य: |
| का ? | - | भूमि: |
| कदा? | - | वसन्तसमये समुपागते हि। |

## अन्वय:।

वसन्तसमये समुपागते हि भूमि: सद्य: आदीप्तवह्निसदृशै: अपयातपत्रै: कुसुमावकीर्णै: सर्वत्र किंशुकवनै: रक्तांशुका नववधू: इव भाति।

## आशय:।

वसन्तकाले सम्प्राप्ते हि इयं भूमि: झटिति प्रज्वलिताग्निकल्पै: निर्गलितपत्रै: पुष्पभरनतै: भूतले सर्वत्र पलाशनिकरैः अभिव्याप्ता , रक्तवसना नवोढा इव राजते।

[**वृत्तम् -** वसन्ततिलका।]

# पठनप्रवर्तनानि।



**आकाङ्क्षाप्रश्नान् सङ्घे चर्चित्वा अन्वयं लिखतु।**

श्रद्धेयाः अंशाः -

प्रश्नानां वाचनम्।

चर्चा।

अन्वयलेखनम्।



**श्लोकव्याख्यानं कक्ष्यायां चर्चित्वा आशयं स्ववाक्यैः लिखतु।**

श्रद्धेयाः अंशाः -

पदच्छेदः- पदार्थोक्तिः।

विग्रहः वाक्ययोजना च।

आशयलेखनम्।



**लक्षणसमन्वयपूर्वकं वृत्तं निर्धारयतु।**

श्रद्धेयौ अंशौ -

गणनिर्णयः।

वृत्तनिर्धारणम्।



**अनुप्रासालङ्कारं लक्षणसमन्वयपूर्वकं समर्थयतु।**

श्रद्धेयौ अंशौ -

अलङ्कारज्ञानम्।

लक्षणसमन्वयपूर्वकं समर्थनम्।



**कवितायाः गानाविष्कारं (संस्कृतेन कैरल्या च) कृत्वा कक्ष्यायाम् अवतारयतु। शब्दमुद्रणं कृत्वा पुनः शृणोतु।**

श्रद्धेयाः अंशाः -

गानाभ्यासः।

अवतरणम्।

शब्दमुद्रणं कृत्वा पुनःश्रवणम्।

## किमधिगतम्।

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगत्यर्थं यत्नः करणीयः |
|---|---|---|---|
| अन्वयलेखनं कृतम्। | | | |
| आशयलेखनं कृतम्। | | | |
| वृत्तनिर्धारणं कृतम्। | | | |
| अलङ्कारसमर्थनं कृतम्। | | | |
| गानाविष्करणं कृतम् | | | |

## अनुबन्धः।

1

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।
विषादी **दीर्घसूत्री** च कर्ता तामस उच्यते।। (भगवद्गीता- 18-28)

**बृहत्साम तथा साम्नां गायत्री छन्दसामहम्।**
**मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः।।** (भगवद्गीता- 10-35)

## 2. ऋतुसंहारम् (कैरल्यनुवादः)।

(ഋതുസംഹാരം - ശ്രീ വിഷ്ണുനാരായണൻ നമ്പൂതിരി)

### വസന്തകാലവർണ്ണന

വേർതൊട്ട് വാഴ്കും പവിഴച്ചുകപ്പാർ-
ന്നിളം തളിർപ്പൂങ്കുലയാലണിഞ്ഞും
കൺനട്ടു നില്ക്കുന്ന യുവാവിനുള്ളം
സശോകമാക്കുന്നിതശോകമിപ്പോൾ.

മത്താർന്ന വണ്ടുകൾ നുകർന്ന സുമങ്ങളോടും
തൈത്തെന്നലേറ്റിളകിടുംതളിരോടുമിപ്പോൾ
നോക്കുന്ന കാമിഹൃദയങ്ങളിലുത്സുകത്വം
ചേർക്കുന്നതുണ്ടുചിതമോടിളമുല്ലവള്ളി.

കാന്താമുഖദ്യുതി ഭജിച്ചഴകേറെ നേടി-
യിപ്പോൾ വിരിഞ്ഞ കുരവത്തുടുപൂക്കൾ കണ്ടാൽ
ആർക്കോമനേ! സഹൃദയത്വമെഴുന്നുവെങ്കിൽ
കന്ദർപ്പബാണനിരയേറ്റിടറില്ല ചിത്തം ?

കത്തുന്ന തീയ്യഴകൊടേ മലരാൽ കുനിഞ്ഞു,
തൈക്കാറ്റിലാടിനമുരുക്കുവനങ്ങളെങ്ങും
ക്ഷിപ്രം വസന്തകൃപകൊണ്ടു നിറച്ചു ഭൂമി
ചെമ്പട്ടണിഞ്ഞ വധുപോലെ വിളങ്ങി നിൽപ്പൂ.

काव्यस्य माधुर्यात् रूपकेषु मानुषिकभावस्य चित्रणं कथमिति पश्यामः।

# एककम् २
# भावदीप्तिः



## आमुखम्

विश्वमानविकतायाः मूल्यानि यद्यपि पौराणिकेषु ग्रन्थेषु समवलोक्यन्ते तथापि अद्यत्वे अस्याः प्राधान्यं महत्त्वं च वर्धमानमवलोक्यते। विश्वे सम्भूतं सर्वमपि सहजीविस्नेहेन बद्धमिति कालिदासादिभिः महाकविभिः प्रस्तुतम्। दृश्यं वा श्रव्यं वा काव्यं प्रत्येकमपि विश्वमानविकतायाः अमूर्तसङ्कल्पस्य विशालमाशयम् अनुवाचकेषु उन्मीलयति।

पाठः-३

# सुवर्णशाकटिकम्।

पाठप्रवेशः

विश्वसाहित्यकाराणां नामानि स्मरन्ति वा? तेषां कृतीनां नामानि जानन्ति वा?

कालिदासः अभिज्ञानशाकुन्तलम्

षेक्स्पियर् ओथल्लो

विश्वसाहित्यकृतित्वेन प्रसिद्धं संस्कृतनाटकं भवति शाकुन्तलम्। भवन्तः जानन्ति किल? विश्वसाहित्यकृतित्वेन प्रथितम् अन्यतमं प्रकरणं परिचिनुमः।

## आमुखम्

महाकविशूद्रकविरचितं विश्वप्रसिद्धं दशाङ्कयुतं प्रकरणं भवति मृच्छकटिकम्। प्रकरणेऽस्मिन् नायकः दानधर्मादिभिः विश्रुतः दरिद्रः चारुदत्तः। सः उज्जयिन्यां श्रेष्ठिचत्वरम् अधिवसति स्म। नायिका सौशील्यादिगुणैः प्रसिद्धा वसन्तसेना नाम गणिका। स्वकीयं सर्वस्वम् अन्येभ्यो वितीर्य चारुदत्तः स्वयं दरिद्रोऽभवत्। तस्य च पुत्रो बालकः रोहसेनः प्रातिवेशिकशिशोः सुवर्णशकटिकां दृष्ट्वा खिन्नोऽभवत्। वसन्तसेना तु तद्दृष्ट्वा स्वीयानि सुवर्णाभरणानि रोहसेनाय ददाति। सुवर्णशकटिकां निर्माय क्रीडार्थं प्रेरयति च। नाटकस्य षष्ठाङ्के अन्तर्भूतः चेतोहरः अयं भागः कथाप्रमेयपरिवर्तने निर्णायकं स्थानमावहति। अस्मिन् पाठे व्यञ्जनाश्रितं सन्धिप्ररूपमपि प्रदर्शयितुं प्रयत्नः कृतः।

**कथापात्राणि**

रदनिका - चारुदत्तस्य दासी।

दारकः (रोहसेनः)- चारुदत्तस्य पुत्रः रोहसेनः।

वसन्तसेना - चारुदत्तस्य प्रणयिनी।



(ततः प्रविशति दारकं गृहीत्वा रदनिका।)

रदनिका - एहि वत्स! , शकटिकया क्रीडावः।

दारकः - रदनिके! किं ममैतया मृत्तिकाशकटिकया? तामेव सौवर्णशकटिकां देहि।

रदनिका - (सनिर्वेदं निःश्वस्य) जात! कुतोऽस्माकं सुवर्णव्यवहारः? तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीडिष्यसि। तद्यावद्विनोदयाम्येनम्। आर्यायाः वसन्तसेनायाः समीपमुपसर्प्यामि। (उपसृत्य) आर्ये! प्रणमामि।

वसन्तसेना - रदनिके! स्वागतं ते। कस्य पुनरयं दारकः? अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

रदनिका - एष खल्वार्यचारुदत्तस्य पुत्रो रोहसेनो नाम।



| | | |
|---|---|---|
| वसन्तसेना | - | (बाहू प्रसार्य) एहि मे पुत्रक! आलिङ्ग। (इत्यङ्क उपवेश्य) अनुकृतमनेन पितू रूपम्। |
| रदनिका | - | न केवलं रूपम् शीलमपि तर्कयामि। एतेन आर्यचारुदत्तः आत्मानं विनोदयति। |
| वसन्तसेना | - | अथ किं निमित्तमेष रोदिति? |
| रदनिका | - | एतेन प्रतिवेशिगृहपतिदारकस्य सुवर्णशकटिकया क्रीडितम्। तेन च सा नीता। ततः पुनस्तां याचतो मयेयं मृत्तिकाशकटिका कृत्वा दत्ता। ततो भणति - रदनिके किं ममैतया मृत्तिकाशकटिकया? तामेव सौवर्णशकटिकां देहीति। |
| वसन्तसेना | - | हा धिक्! हा धिक्! अयमपि नाम परसम्पत्त्या सन्तप्यते। भगवन्कृतान्त ! पुष्करपत्रपतितजलबिन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः (इति सास्रा) जात! मा रुदिहि, सौवर्णशकटिकया क्रीडिष्यसि। |
| दारकः | - | रदनिके! कैषा? |
| वसन्तसेना | - | पितुस्ते गुणनिर्जिता दासी। |
| रदनिका | - | जात! आर्या ते जननी भवति। |
| दारकः | - | रदनिके अलीकं त्वं भणसि। यद्यस्माकम् आर्या जननी तत् किमर्थमलङ्कृता। |
| वसन्तसेना | - | जात! मुग्धेन मुखेन अतिकरुणं मन्त्रयसे। |



(नाट्येन आभरणान्यवतार्य रुदती)
एषेदानीं ते जननी संवृत्ता।

तद्गृहाणैतमलङ्कारम्। सौवर्णशकटिकां कारय।

दारक: - अपेहि! न ग्रहिष्यामि। रोदिषि त्वम्?

वसन्तसेना - (अश्रूणि प्रमृज्य) जात! न रोदिष्यामि। गच्छ क्रीड। (अलङ्कारैर्मृच्छकटिकां पूरयित्वा) जात! कारय सौवर्णशकटिकाम्।

(इति दारकमादाय निष्क्रान्ता रदनिका।)

## पदच्छेदः।

| | | |
|---|---|---|
| ममैतया | - | मम + एतया। |
| कुतोऽस्माकम् | - | कुतः + अस्माकम्। |
| पुनरपि | - | पुनः + अपि। |
| तद्यावद्विनोदयाम्येनम् | - | तत् + यावत् + विनोदयामि + एनम्। |
| समीपमुपसर्प्स्यामि | - | समीपम् + उपसर्प्स्यामि। |
| अनलङ्कृतशरीरोऽपि | - | अनलङ्कृतशरीरः + अपि। |
| एष खल्वार्यचारुदत्तस्य | - | एषः + खलु + आर्यचारुदत्तस्य। |
| पुत्रो रोहसेनो नाम | - | पुत्रः + रोहसेनः + नाम। |
| अनुकृतमनेन | - | अनुकृतम् + अनेन। |
| पितू रूपम् | - | पितुः + रूपम्। |
| इत्यङ्क उपवेश्य | - | इति + अङ्के + उपवेश्य। |
| एतेनार्यचारुदत्तः | - | एतेन+आर्यचारुदत्तः। |
| किंनिमित्तमेष रोदिति | - | किंनिमित्तम् + एषः + रोदिति। |
| पुनस्ताम् | - | पुनः + ताम्। |
| ममेयम् | - | मम+ इयम्। |
| कैषा | - | का+ एषा। |
| पितुस्ते | - | पितुः + ते। |
| यद्यस्माकमार्या | - | यदि + अस्माकम् + आर्या। |
| तत्किमर्थमलङ्कृता | - | तत् + किमर्थम् + अलङ्कृता। |
| मुखेनातिकरुणम् | - | मुखेन + अतिकरुणम्। |

आभरणान्यवतार्य - आभरणानि + अवतार्य।

एषेदानीम् - एषा + इदानीम्।

गृहाणैतमलङ्कारम् - गृहाण + एतम् + अलङ्कारम्।

अलङ्कारैर्मृच्छकटिकाम् - अलङ्कारैः + मृच्छकटिकाम्।

## विग्रहः।

सुवर्णव्यवहारः - सुवर्णस्य व्यवहारः।

मृत्तिकाशकटिकया - मृत्तिकया निर्मिता शकटिका, तया।

सौवर्णशकटिकया - सुवर्णमयी शकटिका, तया।

अनलङ्कृतशरीरः - अलङ्कृतं शरीरं यस्य सः अलङ्कृतशरीरः,
न अलङ्कृतशरीरः।

आर्यचारुदत्तः - आर्यश्चासौ चारुदत्तः च।

प्रतिवेशिगृहपतिदारकस्य - प्रतिवेशः अस्य अस्तीति प्रतिवेशी,
स चासौ गृहपतिश्च प्रतिवेशिगृहपतिः,
तस्य दारकः प्रतिवेशिगृहपतिदारकः,
तस्य।

मृच्छकटिका - मृदा निर्मिता शकटिका।

अतिकरुणम् - अतिशयेन करुणः तम्।

चन्द्रमुखः - चन्द्र इव मुखं यस्य सः।

पुष्करपत्रपतितजलबिन्दुसदृशैः- पुष्करपत्रे पतिताः ये जलबिन्दवः
तत्सदृशैः ।

पुरुषभागधेयैः - पुरुषाणां भागधेयं, तैः।

# व्याकरणकार्यम्।

## हल् सन्धिः।

**01 तच्च - तत् + च।**

अत्र तवर्गात् चवर्गस्य योगः वर्तते। अत: तकारस्य स्थाने चकारादेश: स्यात्।

स्तो: श्चुना श्चु: ८/४/४०

सकारतवर्गयो: शकारचवर्गाभ्यां योगे शकारचवर्गौ स्त:।

यथा - तच्चित्रम् - तत् + चित्रम्।

सच्चरितम् - सत् + चरितम्।

**02 एतच्छकटिका - एतत् + शकटिका। एतच् + शकटिका।**

अत्र चकारात् परे शकार: वर्तते। अत: अत्र शकारस्य स्थाने वक्ष्यमाणेन 'शश्छोऽटि' इति सूत्रेण छकारादेशः भवति।

शश्छोऽटि ८/४/६३

पदान्तात् झय: परस्य शस्य छो वा स्यादटि।

टिप्पणिः- झय् - झ, भ, घ, ढ, ध, ज, ब, ग,ड,द, ख फ,छ,ठ,थ, च, ट ,त, क, प।

अट्- स्वराक्षराणि, ह,य,व,र इति व्यञ्जनाक्षराणि च।

यथा - मृच्छकटिका - मृत् +शकटिका।

मृच् + शकटिका। ( स्तोः श्चुनाश्चुः)

मृच् + छकटिका। ( शश्छोऽटि)

तच्छ्रुत्वा - तत् + श्रुत्वा ।

- तच् + श्रुत्वा । ( स्तोः श्चुनाश्चुः)

- तच् + छ्रुत्वा । ( शश्छोऽटि)

**03 यावल्लालयामि - यावत् + लालयामि।**

अत्र तकारात् परे लकारः वर्तते। अतः तकारस्य स्थाने परसवर्णः लकारः एव भवति।

तोर्लि ८ /४ /६०

तवर्गस्य लकारे परे परसवर्णः स्यात्।

यथा -

तल्लयः - तत् + लयः।

उल्लसति - उत् + लसति।

**04 स्वागतं ते - स्वागतम् + ते।**

अत्र मकारान्तस्य पदस्य पश्चात् व्यञ्जनाक्षरम् अस्ति। अतः मकारस्य अनुस्वारः स्यात्। स्वराक्षरे परे मकार एव स्यात्।

मोऽनुस्वारः ८/३/२३

मान्तस्य पदस्य अनुस्वारः स्याद्धलि।

टिप्पणिः - स्यात् + हलि - स्याद्धलि। हल् - व्यञ्जनाक्षराणि।

यथा - हरिम् + वन्दे। - हरिं वन्दे।

संस्कृतम् + पठति। - संस्कृतं पठति ।

**05 एतन्मया - एतत् +मया।**

अत्र तकारात् परे मकारः (अनुनासिकः) अस्ति। अतः तकारस्य अपि अनुनासिकवर्णः भवितुमर्हति।

यरोऽनुनासिकेऽनुनासिको वा ८/४/४५

यरः पदान्तस्य अनुनासिके परे अनुनासिको वा स्यात्।

टिप्पणिः - यर् हकारवर्ज्यानि व्यञ्जनानि।

यथा -

चिन्मयः - चित् + मयः।

वाङ्मयम् - वाक् + मयम्।

## पठनप्रवर्तनानि।



**पाठभागं काक्वनुसारं भावानुसारं च कक्ष्यायाम् अवतार्य वीडियो निर्मातु।**

**श्रद्धेयाःअंशाः-**

नाटकस्य अभ्यासः।

कक्ष्यायां दृश्याविष्करणम्।

वीडियो चित्रीकरणं प्रदर्शनं च।



**नाटकेन अनावृतां सामूहिकावस्थां चर्चित्वा कथापात्राणां स्वभावं निरूपयतु।उपन्यासं च लिखतु।**

**श्रद्धेयाः अंशाः-**

सामूहिकावस्थामधिकृत्य चर्चा।

पात्रस्वभावनिरूपणम्।

लघूपन्यासलेखनम्।



**वसन्तसेनया रोहसेनाय पुरस्कृतं सुवर्णाभरणं कथागतिं कथं परिवर्तयति इति मृच्छकटिककथासंग्रहं पठित्वा निर्धारयतु।टिप्पणिं च लिखतु।**

**श्रद्धेयाः अंशाः-**

नाटकपाठस्य सम्यक् पठनम्।

कथासंग्रहस्य वाचनं चर्चा च।

टिप्पणीलेखनम्।



**उदाहरणानुसारं पट्टिकां पूरयतु।**

| तोर्लि | स्तोः श्चुना श्चुः | शश्छोऽटि | यरोऽनुनासिकेऽनुनासिको वा | मोऽनुस्वारः |
|---|---|---|---|---|
| विद्वाँल्लिखति। | चलच्चित्रम्। | तच्छिवः। | तन्मात्रा। | किं निमित्तम्। |
| .................. | .................. | .................. | .................. | .................. |
| .................. | .................. | .................. | .................. | .................. |
| .................. | .................. | .................. | .................. | .................. |
| .................. | .................. | .................. | .................. | .................. |

चलच्चित्रम्, तच्छिवः, चिन्मयः, वदनं ते, तल्लयः, हरिं वन्दे, तच्चित्रम्, विद्वाँल्लिखति, तच्छ्रुत्वा, एतल्ललाटः, सज्जनः, तावच्छक्तिः, दिङ्मुखम्, जीवच्छवः, गीतं तव, तन्मात्रा, विद्युच्छक्तिः, संस्कृतं पठति, लसल्ललितम्, किं निमित्तम्।

**श्रद्धेयाः अंशाः-**

सूत्रार्थज्ञानम्।

उदाहरणानाम् अपग्रथनम्।

यथास्थानं विन्यासः।



**HB साहाय्येन कक्ष्यायां चर्चित्वा सूत्रार्थविचारस्पर्धां प्रचालयतु, टिप्पणीं च लिखतु।**

**सूत्राणि**

अ) ष्टुना ष्टुः।

आ) झयो होऽन्यतरस्याम्।
इ) नश्चापदान्तस्य झलि।
ई) अनुस्वारस्य ययि परसवर्णः।
उ) वा पदान्तस्य।
ऊ) नश्छव्यप्रशान्।
ऋ) अत्रानुनासिकः पूर्वस्य तु वा।
ॠ) अनुनासिकात्परोऽनुस्वारः।

**श्रद्धेयाः अंशाः -**

निर्दिष्टभागानां वाचनम् अवधारणं च।
संघे स्थित्वा सूत्रार्थविचारस्पर्धा ।
टिप्पणीलेखनम्।

## अनुबन्धः।

| रूपकम् | कर्ता |
|---|---|
| अभिज्ञानशाकुन्तलम्। | कालिदासः। |
| विक्रमोर्वशीयम्। | कालिदासः। |
| मालविकाग्निमित्रम्। | कालिदासः। |
| उत्तररामचरितम्। | भवभूतिः। |
| मालतीमाधवम्। | भवभूतिः। |
| महावीरचरितम्। | भवभूतिः। |
| नागानन्दम्। | श्रीहर्षः। |
| सुभद्राधनञ्जयम्। | कुलशेखरः। |
| आश्चर्यचूडामणिः। | शक्तिभद्रः। |
| वेणीसंहारम्। | भट्टनारायणः। |
| मुद्राराक्षसम्। | विशाखदत्तः। |
| स्वप्नवासवदत्तम्। | भासः। |

## रूपकप्रभेदाः।

दृश्यश्रव्यभेदेन काव्यं द्विधा वर्तते। तत्र दृश्यकाव्यं रूपकमित्यभिधीयते। रूपकाणि दशप्रकाराणि सन्ति।

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।। *(साहित्यदर्पणः प-6-का-275)*

नाटकानि इव प्रसिद्धानि मनोरञ्जकानि च भवन्ति प्रकरणानि। प्रकरणस्य लक्षणमित्थम्-

भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।।
सापायधर्मकामार्थपरो धीरप्रशान्तकः।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्।।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः।
कितवद्यूतकारादिविटचेटकसंकुलः।।

तत्र च प्रसिद्धं भवति शूद्रकविरचितं मृच्छकटिकम्।

## मृच्छकटिककथासङ्ग्रहः ।

प्रकरणेऽस्मिन् नायकः दानधर्मादिभिः विश्रुतः उज्जयिन्यां श्रेष्ठिचत्वरम् अधिवसन् दरिद्रः चारुदत्तः। नायिका सौशील्यादिगुणैः प्रसिद्धा वसन्तसेना नाम गणिका च। तौ कामदेवायतनोद्यानात् प्रभृति परस्परम् अनुरक्तौ बभूवतुः। एकदा वसन्तसेना आत्मनः अनुरागम् आवेदयितुं रात्रौ चारुदत्तस्य गृहं प्रस्थितवती। मार्गे राजस्यालस्य संस्थानकस्य शकारस्य याञ्चां विगणय्य सा कथमपि आत्मानं रक्षित्वा चारुदत्तस्य गृहं प्राप। तत्र सा आत्मनो हेमभूषणानि न्यासरूपेण चारुदत्तस्य हस्ते समर्पयामास। अचिरात् तान्याभरणानि दरिद्रः ब्राह्मणः शर्विलकः अपाहरत्। सः तानि तस्य प्रणयिन्यै मदनिकायै उपाहृतवान् च। सा तु तानि वसन्तसेनायाः आभरणानि इति प्रत्यभिज्ञाय तस्यै दातुम् उपदिदेश। वसन्तसेना च गवाक्षद्वारा मदनिकाशर्विलकयोः सम्भाषणं श्रुतवती। सा तमलीकदूतं विज्ञाय दास्यात् तां मदनिकां मोचयित्वा शर्विलकस्य करे अर्पितवती।

अत्रान्तरे चारुदत्तेन संरक्षितं सुवर्णभाण्डं चौरैरपहृतमिति ज्ञात्वा चारुदत्तः तस्य पतिव्रतया प्रियतमया दत्तां रत्नमालिकां वसन्तसेनायै दातुं मैत्रेयं नियोजयति स्म। वसन्तसेना च रत्नमालिकां स्वीकृत्य एवं अकथयत्-इदानीमहं तं प्रेषितुं गच्छामि यदा प्रदोषे तमुपसर्पामि। अतिवृष्टेः कारणात् सा तां निशां तत्रैव अयापयत्। प्रभाते सा रदनिकया साकं चारुदत्तपुत्रं रोहसेनं पश्यति।

** ** ** ** ** ** **

प्रवहणविपर्ययेण वाहनं प्रविष्टा वसन्तसेना चारुदत्तं द्रष्टुं पुष्पकरण्डकोद्यानं प्राप। विटेन सह राजस्यालं शकारमेव सा तत्रापश्यत्। कामार्तः शकारः तां दृष्ट्वा अतीव मुग्धः सन् तां वशीकर्तुं बहुधा प्रायतत। विटचेटाभ्यां निवारितोऽपि सः उद्यमात् न निवृत्तः। तदसहमानौ विटचेटौ ततः निर्गतौ। शकारः तु तस्य अभ्यर्थनातिरस्कारेण क्रुद्धः सन् वसन्तसेनां दण्डयितुमारभत। मूर्च्छिता सा भूमौ अपतत्। सा मृतेति विचिन्त्य शुष्कपर्णैः ताम् आच्छाद्य शकारः निर्गतः।

तदात्वे तत्रागतस्य बुद्धसंन्यासिनः चीरात् पतितेन जलेन मोहालस्यादुत्थिता वसन्तसेना वृत्तान्तं सर्वं तस्मै न्यवेदयत्। सः विश्रमाय तां समीपस्थं बुद्धविहारमनयत्। अत्रान्तरे संस्थानकः शकारः न्यायाधिपम्* उपगम्य चारुदत्तेन वसन्तसेना मारिता इति न्यवेदयत्। न्यायाधिपस्य निर्देशेन निजस्थितिं ज्ञातुं चारुदत्तः तत्रानीतः। चारुदत्तस्य प्रश्नवेलायां तत्र समुपागतः नगररक्षाधिकारी वीरकोऽपि चारुदत्तस्य प्रवहणमारूढा वसन्तसेना पुष्पकरण्डकोद्यानं नीता इति अकथयच्च। सौवर्णशकटिकानिर्माणाय रोहसेनाय दत्तम् आभरणं वसन्तसेनायै प्रत्यर्पयितुं नियुक्तः मैत्रेयः मार्गमध्ये सुहृदम् आपदि पतितं ज्ञात्वा तत्रागतः। तस्य कक्षात् पतितम् आभरणभाण्डं निरीक्ष्य आभरणलाभाय दरिद्रः चारुदत्तः वसन्तसेनां मारितवान् इति संस्थानकः आरोपयामास। एतेषां दृष्टान्तानां साहाय्येन चारुदत्तः कृतागः एव इति न्यायाधिपेन निश्चयः कृतः। चारुदत्ताय शूलारोपणदण्डं विधातुं निश्चयः कृतः। दण्डनं विधातुं सः श्मशानं प्रति नीतः। श्मशानयात्रामध्ये तत्र तत्र दण्डनघोषणमपि यथास्थानं कृतञ्च। संस्थानकस्य प्रासादसमीपे कृतं घोषणं श्रुत्वा बन्धनस्थः स्थावरकः यद्यपि स्वयमेव

---

** न्यायाधिपः- अधिकरणिकः (Judge)*

उपरिष्टात् पतित्वा तथ्यं बोधयितुं प्रयत्नं कृतवान् तथापि असफलो जातः। मार्गमध्ये रोहसेनः मैत्रेयश्च तेषां प्राणान् दत्वापि चारुदत्तस्य प्राणरक्षणाय अयाचेताम्। अन्ते सः श्मशानकवाटं प्राप। तदा झटिति तत्रागता वसन्तसेना चारुदत्तस्य पादयोः पतित्वा सकरुणं विललाप। वसन्तसेनायाः प्रत्यागमनेन निजस्थितिं ज्ञात्वा चारुदत्तं श्मशानं नीतवन्तौ चण्डालौ तं बन्धनात् मोचयामासतुः। तत्रागतः शर्विलकः राज्ञः सन्देशं चारुदत्ताय विज्ञापयामास। चारुदत्तः उज्जयिन्यां वेणातटे कुशावत्यां राजा भवतीति ख्यापनामकरोत्।

तदा चारुदत्तस्य प्रियायाः धूतायाः अग्निप्रवेशनवार्तां श्रुत्वा चारुदत्तः शर्विलकादिभिः सह प्रस्थितः। ततः धूतां रोहसेनं च ससम्भ्रमं तस्मादुद्यमात् निवारयामास। तथा रदनिकां मैत्रेयं च सान्त्वयामास। वसन्तसेना धूता च परस्परमालिङ्ग्य आनन्दसागरे मग्ने बभूवतुः।

राजपदवीमारूढः आर्यकश्च उचितैरुपहारैः सर्वान् तोषयामास। वसन्तसेनायै चारुदत्तस्य वधूपदवीं दत्वा तस्याः आदरमकरोत्। एवं सर्वे सन्तुष्टाः अभवन्।

## शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | आङ्गलेयम् |
|---|---|---|---|
| शकटिका | क्रीडायानम् | കളിവണ്ടി | Toy cart |
| ऋद्ध्या | सम्पदा | സമ്പത്തിനാൽ | By prosperity |
| प्रसार्य | प्रसारणं कृत्वा | നീട്ടിയിട്ട് | Having spread out |
| अनुकृतं | अनुकरणरूपेण कृतम् | അനുകരിക്കപ്പെട്ട | Imitated |
| प्रतिवेशिकः | समीपगृहवासी | അയൽക്കാരൻ | Neighbour |
| सन्तप्यते | दह्यते | തപിക്കപ്പെടുന്നു | Suffering Pain |
| पुष्करपत्रम् | कमलपत्रम् | താമരയില | Lotus leaf |
| सास्रा | अश्रुपूर्णा | കണ്ണുനീർ നിറഞ്ഞ (സ്ത്രീ) | Full of tears (F) |

| | | | |
|---|---|---|---|
| अलीकम् | व्याजम् | കള്ളം | Lie |
| मुग्धः | रमणीयः | മനോഹരമായ | Beautiful |
| प्रमृज्य | मार्जनं कृत्वा | തുടച്ചു നീക്കിയിട്ട് | Having wiped out |
| मृच्छकटिका | मृदा निर्मिता शकटिका | മൺ വണ്ടി | Cart made of clay |

## किमधिगतम्।

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः करणीयः। |
|---|---|---|---|
| प्रकरणावतरणम्। | | | |
| पात्रस्वभावनिरूपणम् उपन्यासलेखनं च। | | | |
| कथागतिमधिकृत्य टिप्पणीलेखनम्। | | | |
| सूत्रोदाहरणानां पट्टिकापूरणम्। | | | |
| सूत्रार्थविचारस्पर्धा। | | | |

स्नेहस्य विविधभावाः काव्ये कथं वर्णिताः इति पश्यामः।

## पाठः-४



# काव्यामृतम्

**पाठप्रवेशः**

श्रीमता मेल्पुत्तूर् नारायणभट्टपादेन विरचितात् नारायणीयात् उलूखलबन्धनं नाम दशकात् उद्धृतान् रथोद्धतावृत्तनिबद्धान् श्लोकान् शृणुमः।

## आमुखम्

भवभूतेः नाट्यप्रतिभायाः सर्वोत्तमनिदर्शनं भवति उत्तररामचरितं नाम नाटकम्। "उत्तरे रामचरिते भवभूतिर्विशिष्यते" इति प्रसिद्धा उक्तिः अस्ति। रामायणमाश्रित्य सप्ताङ्कात्मके नाटके श्रीरामस्य राज्याभिषेकादारभ्य लोकापवादेन सीतानिर्वासनं ततश्च सीतारामसम्मेलनं यावत् कथा वर्णितास्ति। अस्मिन् रूपके करुण एव मुख्यो रसः।

एको रसः करुण एव निमित्तभेदा-
द्भिन्नः पृथक्पृथगिव श्रयते विवर्तान् ।
आवर्तबुद्बुदतरङ्गमयान्विकारा-
नम्भो यथा सलिलमेव हि तत्समस्तम्।। (उ. रा. च - 3.47)

स्नेहस्य विभिन्नभावानां प्रतिपादनाय तथैव छन्दसां ज्ञानाय स्वभावोक्त्यलङ्कारस्य परिचायनाय च सहायकाः चत्वारः श्लोकाः अत्र समाकलिताः।



चित्रदर्शनवेलायां गर्भालस्येन परिक्षीणां सीतां समाश्वासयन् रामः एवं वदति।

1 जीवयन्निव ससाध्वसश्रम-

स्वेदबिन्दुरधिकण्ठमर्प्यताम् ।

बाहुरैन्दवमयूखचुम्बित-

स्यन्दिचन्द्रमणिहारविभ्रमः ॥ *(उ.रामचरितम् प्रथमोऽङ्कः-३४)*

**पदच्छेदः।**

| | | |
|---|---|---|
| जीवयन्निव | - | जीवयन् + इव। |
| स्वेदबिन्दुरधिकण्ठं | - | स्वेदबिन्दुः + अधिकण्ठम्। |

**पदार्थः।**

| | | |
|---|---|---|
| ससाध्वसम् | - | सभयम् (सोत्कण्ठं) |
| श्रमः | - | आयासः |
| ऐन्दवाः | - | चन्द्रसम्बन्धिनः |
| मयूखाः | - | किरणाः |

| | | |
|---|---|---|
| स्वेदबिन्दुः | - | तापजलबिन्दुः |
| चुम्बितः | - | स्पृष्टः |
| स्यन्दी | - | निष्यन्दी/जलस्रावयुक्तः |
| चन्द्रमणिहारः | - | चन्द्रकान्तमणिमाला |
| विभ्रमः | - | सन्देहः |
| जीवयन् इव | - | प्राणान् धारयन् इव |
| बाहुः | - | स्वभुजः |
| अधिकण्ठम् | - | (मदीये) कण्ठे |
| त्वया | - | भवत्या ( सीतया ) |
| अर्प्यताम् | - | निधीयताम्। |

## विग्रहः।

| | | |
|---|---|---|
| ससाध्वसश्रमस्वेदबिन्दुः | - | साध्वसेन सह वर्तते इति ससाध्वसं, श्रमेण सह वर्तते इति सश्रमं, ताभ्यां ये स्वेदबिन्दवः तादृशाः। |
| अधिकण्ठम् | - | कण्ठे इति। |

ऐन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः-

इन्दोरिमे ऐन्दवाः, - (चन्द्रसम्बन्धिनः), ऐन्दवाः ये मयूखाः (किरणाः) - ऐन्दवमयूखाः, तैः चुम्बितः-(स्पृष्टः) - ऐन्दवमयूखचुम्बितः,अत एव स्यन्दी - ऐन्दवमयूखचुम्बितस्यन्दी, (जलस्रावयुक्तः), तादृशः चन्द्रमणिहारः (चन्द्रकान्तमणिमाला) तस्य इव विभ्रमः (विलासयुक्तः) तादृशः करः ।

**अन्वयः ।**

ससाध्वसश्रमस्वेदबिन्दुः ऐन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः जीवयन् इव बाहुः अधिकण्ठम् अर्प्यताम्।

**सारांशः ।**

चन्द्रकिरणस्पर्शेन चन्द्रकान्तात् समुद्भूतजलबिन्दवः इव भयक्लमाभ्यां संजायमानैः स्वेदबिन्दुभिः समलङ्कृतः तथा (मम) जीवधारणकरः तव करः मम कण्ठे समर्पय।

| | | |
|---|---|---|
| वृत्तम् | - | रथोद्धता। |
| लक्षणम् | - | रान्नराविह रथोद्धता लगौ। |

| र | न | र | ल गु |
|---|---|---|---|
| - U - | UUU | - U - | U - |
| *एकदा* | *दधिवि* | *माथका* | *रिणीं* |

*मातरं समुपसेदिवान् भवान् ।*<br>
स्तन्यलोलुपतया निवारय-<br>
न्नङ्कमेत्य पपिवान् पयोधरौ।। (नारायणीयम्-47-1)

अस्मिन् श्लोके प्रतिपादं रगणं, नगणं, रगणं, लघुः, गुरुः चेति एकादशवर्णाः यथाक्रमं भवन्ति, पादान्ते यतिश्च ।अतः तत् रथोद्धता नाम वृत्तं भवति।

** ** ** ** ** ** ** **

**उत्तररामचरिते छायानामकस्य तृतीयाङ्कस्य प्रारम्भे शुद्धविष्कम्भे मुरला तमसा चेति नदीद्वयं प्रविशति। ते च भागीरथ्याः निर्देशानुसारं रामं शोकग्रस्तं प्रमादान्निवारयितुं सन्नद्धे भूत्वा तिष्ठतः। तत्र गोदावरीह्रदात् गङ्गया उन्नीता सीता च तमसायाः सामीप्ये समर्पिता। करुणस्य मूर्तिरिव शरीरिणी विरहव्यथा इव च दृष्टा सीता मुरलया एवं वर्ण्यते।**

2 किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकमलशोषी दारुणो दीर्घशोकः।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम्॥ *(उ.रामचरितम् तृतीयोऽङ्कः -०५*

**पदच्छेदः।**

| | | |
|---|---|---|
| बन्धनाद्विप्रलूनं | - | बन्धनात् + विप्रलूनं। |
| दारुणो दीर्घशोकः | - | दारुणः + दीर्घशोकः। |
| शरदिज इव | - | शरदिजः + इव। |



## पदार्थः।

| | | |
|---|---|---|
| हृदयकमलशोषी | - | हृत्पद्मशोषकः |
| दारुणः | - | कठोरः |
| दीर्घशोकः | - | चिरस्थायि दुःखम् |
| बन्धनात् | - | उद्वानात् |
| विप्रलूनं | - | गलितं |
| मुग्धं | - | सुन्दरं |
| किसलयमिव | - | नवपल्लवमिव |
| परिपाण्डु | - | श्वेतम् |
| क्षामम् | - | कृशम् |
| अस्याः | - | सीतायाः |
| शरीरम् | - | देहः |
| शारदिजः | - | शरत्कालिकः |
| घर्मः | - | आतपः |
| केतकीगर्भपत्रमिव | - | दलाभ्यन्तरस्थितं मृदुपर्णमिव |
| ग्लपयति | - | म्लानं करोति। |

## विग्रहः।

| | | |
|---|---|---|
| हृदयकमलशोषी | - | हृदयम् एव कमलं हृदयकमलं, तं शोषयति इति। |
| दीर्घशोकः | - | दीर्घः चासौ शोकश्च। |
| शारदिजः | - | शरदि जायते इति। |

केतकीगर्भपत्रम् - केतक्याः गर्भं केतकीगर्भं, तस्मिन् यत् पत्रं तत्।

## अन्वयः।

हृदयकमलशोषी दारुणः दीर्घशोकः बन्धनात् विप्रलूनं मुग्धं किसलयमिव परिपाण्डु क्षामम् अस्याः शरीरं शरदिजः घर्मः केतकीगर्भपत्रम् इव ग्लपयति।

## सारांशः ।

हृदयपद्मशोषणसमर्थः अतिकठिनः चिरस्थायि दुःखं, वृन्तात् विगलितं मुग्धं नवपल्लवमिव बन्धनात् निर्मुक्तं पाण्डुवर्णं तथा कृशम् अस्याः शरीरं शरत्कालातपः नवकेतकीपुष्पस्य अन्तर्दलमिव परिशोषयति।

वृत्तम् - मालिनी।

लक्षणम् - ननमयययुतेयं मालिनी भोगिलोकैः।

न | न | म | य | य

UUU | UUU | - - - | U - - | U - -

सरसि|जमनु|विद्धं शै|वलेना|पि रम्यं

मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी

किमिव हि मधुराणां मण्डनं नाकृतीनाम्।। *(अ.शाकुन्तलम्-1-20)*

अस्मिन् श्लोके प्रतिपादं नगण, नगण, मगण, यगण, यगणाः चेति पञ्चदशवर्णाः यथाक्रमं भवन्ति अष्टसु, सप्तसु च यतिश्च तथा मालिनी नाम वृत्तं भवति ।

** ** ** ** ** * ** ** ** **

**उत्तररामचरिते छायानामके तृतीयाङ्के वनदेवता वासन्ती जनापवादभिया अन्तर्वर्त्नीं सीतां कानने त्यक्तवन्तं रामम् एवं भर्त्सयति।**



3. अयि कठोर! यशः किल ते प्रियं
किमयशो ननु घोरमतः परम्।
किमभवद्विपिने हरिणीदृशः
कथय नाथ! कथं बत! मन्यसे? *(उ.रा.चरितम् तृतीयोऽङ्कः-२७)*

**पदच्छेदः।**

अभवद्विपिने - अभवत् + विपिने।

**पदार्थः।**

अयि कठोर! - हे कठिनहृदय!

यशः - कीर्तिः

ते - तव (रामस्य)

| | | |
|---|---|---|
| प्रियम् | - | अभिलषितम् |
| किल | - | निश्चयेन |
| ननु अतः परं घोरं | - | अस्मात् परं घोरम् |
| अयशः | - | अकीर्तिः |
| हरिणीदृशः | - | मृगाक्ष्याः(सीतायाः) |
| विपिने | - | कानने |
| हे नाथ! | - | हे स्वामिन्! |
| कथं मन्यसे | - | केन प्रकारेण चिन्त्यसे |
| कथय | - | वद |
| बत | - | खेदद्योतकम्। |

## विग्रहः।

हरिणीदृशः - हरिण्याः दृशौ इव दृशौ यस्याः सा हरिणीदृक्, तस्याः।

## अन्वयः।

अयि कठोर! यशः ते प्रियं किल, ननु अतः परं घोरम् अयशः किम्? हरिणीदृशः विपिने किम् अभवत्? नाथ! कथय, कथं मन्यसे? बत।

## सारांशः।

हे कठिनहृदय! राम! तव कीर्तिरेव प्रियं भवति। सीतापरित्यागानन्तरम् अकीर्तिकरं किं भवति? मृगेक्षणायाः कानने किम् अभवत् इत्यधिकृत्य भवान् किं मन्यते? हा कष्टम्।

| | | |
|---|---|---|
| वृत्तम् | - | द्रुतविलम्बितम्। |
| लक्षणम् | - | द्रुतविलम्बितमाह नभौ भरौ। |

न भ भ र
UUU -U U - UU - U -
नवप|लाशप|लाशव|नं पुरः

स्फुटपरागपरागतपङ्कजम्।

मृदुलतान्तलतान्तमलोकयत्

ससुरभिं सुरभिं सुमनोभरैः ॥ **(शिशुपालवधम् -6-2)**

अस्मिन् श्लोके प्रतिपादं नगणभगणभगणरगणाः चेति द्वादशवर्णाः यथाक्रमं भवन्ति । पादान्ते यतिश्च। अतः द्रुतविलम्बितं नाम वृत्तं भवति।

** ** ** ** ** ** ** **

**उत्तररामचरिते कौसल्याजनकयोगनामके चतुर्थेऽङ्के जनकः सीतायाः शैशवावस्थाम् एवं स्मरति।**

**4.** अनियतरुदितस्मितं विराजत्-

कतिपयकोमलदन्तकुड्मलाग्रम्।

वदनकमलकं शिशोः स्मरामि

स्खलदसमञ्जसमञ्जुजल्पितं ते ॥

*(उ.रा.चरितम् चतुर्थोऽङ्कः-०४)*

## पदार्थः।

| | | |
|---|---|---|
| अनियतरुदितस्मितं | - | अनियन्त्रित-रोदन-मन्दहास-सहितम्। |
| विराजत्कतिपयकोमलदन्तकुड्मलाग्रम् | - | शोभायमानकियन्मृदुदन्तमुकुलाग्राणि यस्मिन् तत्। |
| स्खलदसमञ्जसमञ्जुजल्पितं | - | स्खलदव्यक्तपूर्वापरसंगतिशून्यसुन्दरजल्पितम् । |



| | | |
|---|---|---|
| शिशोः | - | बालिकायाः |
| ते | - | तव ( सीतायाः ) |
| वदनकमलं | - | कमलसदृशं मुखं |
| स्मरामि | - | भावयामि। |

## विग्रहः।

| | | |
|---|---|---|
| अनियतरुदितस्मितम् | - | न नियतम् अनियतम् , रुदितं च स्मितं च रुदितस्मितं, अनियतं रुदितस्मितं यस्मिन् तत्। |
| विराजत्कतिपयकोमल | - | कुड्मलानाम् अग्राणि कुड्मलाग्राणि |
| -दन्तकुड्मलाग्रम् | - | दन्ता एव कुड्मलाग्राणि दन्तकुड्मलाग्राणि, विराजन्ति कतिपयानि कोमलानि दन्तकुड्मलाग्राणि यस्मिन् तत्। |

### अन्वयः।

अनियतरुदितस्मितं विराजत्कतिपयकोमलदन्तकुड्मलाग्रं स्खलदसमञ्जस-मञ्जुजल्पितं विराजत् शिशोः ते वदनकमलकं स्मरामि।

### सारांशः।

अनिश्चिताभ्यां रोदनस्मिताभ्यां विराजमानम् ईषदङ्कुरितैः कोमलदन्तैः लसितं अस्पष्टसुन्दरवचनैः मनोज्ञं च बालिकायाः तव मुखपद्मम् अहं स्मरामि।

| | | |
|---|---|---|
| वृत्तम् | - | पुष्पिताग्रा ((अर्धसमवृत्तम्)) |
| लक्षणम् | - | "अयुजि नयुगरेफतो यकारो<br>युजि तु नजौ जरगाश्च पुष्पिताग्रा। |

न | न | र | य
UUU | UUU | - U - | U - -
नरप | तिनिध | नं भव | त्प्रवासं

न | ज | ज | र | गु
UUU | U - U | U - U | - U - | -
भरत | विषाद | मनाथ | तां कुल | स्य।

बहुविधमनुभूय दुष्प्रसह्यं

गुण इव बह्वपराद्धमायुषा मे।। **(प्रतिमानाटकम् 4-18)**

अस्मिन्श्लोकेप्रथमतृतीयपादयोःनगण,नगण,रगण,यगणाःचेतिद्वादशवर्णाः, द्वितीयचतुर्थपादयोः नगण, जगण, जगण, रगणाः गुरुः चेति त्रयोदशवर्णाः यथाक्रमं भवन्ति ।अतः पुष्पिताग्रा नाम वृत्तं भवति ।श्लोके प्रथमतृतीयपादौ अयुक् / विषमपादौ। द्वितीयचतुर्थपादौ युक्/समपादौ।

**अलङ्कारः - स्वभावोक्तिः।**

अत्र अनियतरुदितस्मितं, स्खलदसमञ्जसमञ्जुजल्पितम् इत्यादिभिः शिशोः

सहजस्वभाववर्णनात् स्वभावोक्तिरलङ्कारः। तल्लक्षणं तु -

*स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम्।*

*कुरङ्गैरुत्तरङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते।।*

जात्यादिस्थस्य स्वभावस्य वर्णनं स्वभावोक्तिः।

उत्तरङ्गाक्षैः - चञ्चललोचनैः, स्तब्धकर्णैः - निश्चलकर्णैः, कुरङ्गैः - हरिणैः, उदीक्ष्यते - अवलोक्यते। अत्र कुरङ्गस्वभाववर्णनात् स्वभावोक्तिः।

## पठनप्रवर्तनानि।



**तालल्यसमन्वितं श्लोकं कक्ष्यायाम् आलपतु।**

**श्रद्धेयाःअंशाः-**

समानवृत्तबद्धश्लोकानां श्रवणम्।

आलपनाभ्यासः।

आलपनम्।



**कक्ष्यायां चर्चित्वा श्लोकानाम् अन्वयं लिखतु।**

**श्रद्धेयौ अंशौ -**

श्लोकस्य आशयग्रहणम्।

अन्वयलेखनम्।



**संङ्घे चर्चित्वा श्लोकस्याशयं स्वांशीकृत्य लिखतु।**

**श्रद्धेयौ अंशौ-**

व्याख्यानं पठित्वा चर्चा।

आशयलेखनम्।

**उदाहरणानुसारं पाठस्थश्लोकानां गणनिर्णयं कृत्वा वृत्तं निर्धारयतु।**

**श्रद्धेयाःअंशाः-**

गणनिर्णयः।

वृत्तनिर्धारणम्।

समर्थनम्।

**विशेषश्रद्धार्हाणां छात्राणां कृते वाद्योपकरणानां साहाय्येन संघगानम् अवतारयतु।**

**श्रद्धेयाःअंशाः-**

वाद्योपकरणानां सज्जीकरणम्।

सङ्घे आलपनाभ्यासः।

अवतरणम्।

**चतुर्थश्लोकस्य आशयं स्वांशीकृत्य अलङ्कारं निर्धारयतु।लक्षणसमन्वयं कृत्वा टिप्पणीं लिखतु।**

**श्रद्धेयाःअंशाः-**

आशयस्वांशीकरणम्।

अलङ्कारनिर्धारणम्।

टिप्पणीलेखनम्।

## किमधिगतम्।

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये यत्नः करणीयः |
|---|---|---|---|
| ताललयसमन्वितम् आलापनं कृतम्। | | | |
| अन्वयलेखनं कृतम्। | | | |
| आशयलेखनं कृतम्। | | | |
| गणनिर्णयपूर्वकं वृत्तं निर्धारितम्। | | | |
| वाद्योपकरणानां साहाय्येन सङ्गानावतरणं कृतम्। | | | |
| अलङ्कारस्य लक्षणसमन्वयं टिप्पणीलेखनं च कृतम्। | | | |

## अनुबन्धः।

കരുണമൊരു രസം താൻ ഹേതുഭേദേന നാനാ
പരിണതിയെ വഹിച്ചീടുന്നിതേ മാറി മാറി
തിര നുര ചുഴിയെന്നീ രൂപഭേദങ്ങൾ കാണായ്
വരികിലുമവയെല്ലാം വെള്ളമത്രേ നിനച്ചാൽ. (ചാ.മ.ഉ.രാ.3/48)

## ഉത്തരരാമചരിതം

പരിഭാഷ - ചാത്തുക്കുട്ടിമന്നാടിയാർ

ഖേദത്രാസനിമിത്തമിപ്പൊളുളവാം സ്വേദാംബുവാൽ തിങ്കളിൻ
പാദംകൊണ്ടു കിനിഞ്ഞ ചന്ദ്രമണി ചേർന്നുണ്ടായ ഹാരത്തിനെ
ഖേദിപ്പിച്ചിടുമിക്കരം പ്രിയതമേ! വൈദേഹി, യെൻ ജീവനാ-
മോദം നല്കുവതിന്നുവേണ്ടിയുടനെൻ കണ്ഠത്തിലർപ്പിക്കെടോ.

(ഉ.രാ.ച 1.40)

* * * * * *

ബന്ധമറ്റ നവപല്ലവത്തിനുസമം തളർന്നു വിളറീടുമി-
ബ്ബന്ധുരാംഗിയുടെ മേനി ഹൃത്കുസുമശോഷിയായ വിരഹാഗ്നിയാൽ
ഹന്ത! ഹന്ത! ബഹുകാലമായുരുകിടുന്നു കൈതയുടെയുള്ളിലായ്
ചന്തമോടു വിലസും ദളം കഠിനതാപമേറ്റു തളരും വിധം.

(ഉ.രാ.ച 3.4)

* * * * * *

അതികഠിന!യശസ്സിന്നല്ലയോ മോഹമങ്ങേ-
ക്കിതിലുമധികമായിട്ടെന്തു ദുഷ്കീർത്തിയുള്ളു?
സ്ഥിതിയവളുടെയെന്തായ് ത്തീർന്നു ഹാ ഹന്ത! കാട്ടിൽ
ക്ഷിതിരമണ! ഭവാനെന്തോർത്തിടുന്നൂ കഥിക്ക.

(ഉ.രാ.ച 3.28)

* * * * * *

ചിരിക്കുംമദ്ധ്യത്തിൽ കരയുമതിനേതും നിയമമി-
ല്ലുരയ്ക്കും തെറ്റിക്കൊണ്ടമൃതസമമസ്പഷ്ടമൊഴിയെ
സ്ഫുരിച്ചല്പം കാണാം ചില ചെറിയ പല്ലിങ്ങനെ ലസി-
ച്ചിരിക്കും ബാല്യേ നിന്മുഖകമലമോർക്കുന്നിതതു ഞാൻ.

(ഉ.രാ.ച 4.4)

* * * * * *

अथ प्रकृतेः चारुतां कविः कथं वर्णयति इति पश्यामः।

# एककम् ३

# रामणीयकम्

## आमुखम्

साहित्यकृतयस्तावत् व्यवहारज्ञानाय हृदयशुद्धये धर्मोपलब्धये च महदुपकारकाः भवन्ति। काव्यास्वदनेन जनाः सहृदयाः जायन्ते इति काव्यस्य परमो धर्मः भवति। रामणीयकम् इत्यस्मिन्नेकके शोणनदवर्णनम् इति गद्यकाव्यांशः, चमत्कृतिरिति अलङ्कारपाठश्च समायोजितौ वर्तेते।

पाठः- ५

# शोणनदवर्णनम्

## [ हर्षचरितम्]




**पाठप्रवेशः**

चित्रं पश्यतु- प्रथमावल्यां पद्यकृतयः इति भवन्तः जानन्ति किम्? द्वितीयावल्यां गद्यकृतयः एव सन्ति। पाठेऽस्मिन् हर्षचरिताख्यस्य गद्यकाव्यस्य कञ्चन भागं परिचिनुमः।

### आमुखम्

बाणभट्टस्य हर्षचरितनामिकायाः आख्यायिकाया: प्रथमोच्छ्वासे दुर्वाससा कृतः सरस्वतीशापः तदनुसारं तस्याः भूलोकगमनं च वर्णितम्। स्वर्लोकात् भूतलमवतरन्ती सा अधस्तात् प्रवहन्तं शोणनदं यथा अपश्यत् इति वर्ण्यतेऽस्मिन् पाठे। विसर्गाश्रितः वर्णनियमोऽप्यत्र संकलितो वर्तते।



अपश्यच्चाम्बरतलस्थितैव, हारम् इव वरुणस्य, अमृतनिर्झरमिव चन्द्राचलस्य, शशिमणिनिष्यन्दमिव विन्ध्यस्य कर्पूरद्रुमद्रवप्रवाहमिव दण्डकारण्यस्य, लावण्यरसप्रस्रवणमिव दिशां, स्फाटिकशिलापट्टशयनमिवाम्बर-श्रियाः, स्वच्छशिशिरसुरसवारिपूर्णं भगवतः पितामहस्यापत्यं हिरण्यवाहनामानं महानदं यं जनाः शोण इति कथयन्ति, दृष्ट्वा च तं रामणीयकहृतहृदया तस्यैव तीरे वासमरचयत्।



(व्याख्या - अम्बरतलस्थितैव गगनतलस्थितैव महानदम् अपश्यत् इति दूरेऽन्वयः, वरुणस्य हारमिव- मुक्ताहारमिव, चन्द्राचलस्य - चन्द्र एव अचलः पर्वतः तस्य, अमृतनिर्झरमिव - सुधाधारामिव, विन्ध्यस्य एतन्नामकस्य पर्वतस्य, शशिमणिनिष्यन्दस्य - शशिमणेः चन्द्रकान्तस्य निष्यन्दमिव - निर्झरमिव, दण्डकारण्यस्य - दण्डकवनस्य, कर्पूरद्रुमद्रवप्रवाहमिव - कर्पूरनाम्नः वृक्षस्य यः द्रवः सः तस्य धारामिव प्रवाहमिव, दिशाम् आशानां लावण्यरसप्रस्रवणमिव, लावण्यस्य सौन्दर्यस्य यः रसः जलं तस्य प्रस्रवणं प्रवाहमिव, अम्बरश्रियाः - गगनलक्ष्म्याः, स्फाटिकशिलापट्टमिव- स्फाटिकं मणिरचितं शिलापट्टं तदेव शयनं पर्यङ्कः तद्वत्, स्वच्छशिशिरसुरसवारिपूर्णं स्वच्छं -विमलं, शिशिरं - शीतलं, सुरसं - मधुरं, च यद्वारि सलिलं तेन पूर्णम्, एतादृशं महानदं - सरस्वती अपश्यत् ।)

## अन्वयक्रमः।

(सरस्वती) अम्बरतलस्थिता एव महानदं शोणम् अपश्यत् च। (कीदृशम्?) वरुणस्य हारम् इव, चन्द्राचलस्य अमृतनिर्झरम् इव, विन्ध्यस्य शशिमणिनिष्यन्दम् इव, दण्डकारण्यस्य कर्पूरद्रुमद्रवप्रवाहम् इव, दिशाम् लावण्यरसप्रस्रवणम् इव, अम्बरश्रियाः स्फाटिकशिलापट्टशयनम् इव, स्वच्छशिशिरसुरसवारिपूर्णं भगवतः पितामहस्य अपत्यं हिरण्यवाहनामानं यं जनाः शोणः इति कथयन्ति (शोणं ददर्श)। तं दृष्ट्वा च रामणीयकहृतहृदया [सरस्वती] तस्य तीरे एव वासम् अरचयत्।

## सारांशः।

सरस्वती महानदं शोणम् अम्बरतलस्थिता एव अपश्यत्। कीदृशं नदम्? जलाधिपस्य मौक्तिकमालाम् इव, चन्द्राचलस्य सुधायाः प्रवाहमिव, विन्ध्यपर्वतस्य चन्द्रकान्तमणेः निर्झरमिव, दण्डकारण्यस्य कर्पूरवृक्षाणां रसप्रवाहमिव दिशां सौन्दर्यस्य प्रस्रवणमिव, आकाशलक्ष्म्याः स्फटिकमणिनिर्मितां शिलापट्टशय्यामिव, निर्मलं, शीतलं, सुस्वादु च जलपूर्णम्, ब्रह्मणः सन्तानं हिरण्यवाहनामानं महानदं सरस्वती ददर्श। हिरण्यवाहनामकं नदमेव मानवाः शोणः इति वदन्ति। तं शोणनदं विलोक्य सौन्दर्याकृष्टमनस्का सरस्वती तस्य तीरे अवसत् ॥

**पदच्छेदः।**

अपश्यच्च - अपश्यत् + च। (स्तोः श्चुना श्चुः इति तकारस्य चकारः।)

अम्बरतलस्थितैव - अम्बरतलस्थिता + एव। (वृद्धिरेचि)

पितामहस्यापत्यम् - पितामहस्य + अपत्यम्।( अकः सवर्णे दीर्घः )

**विग्रहः।**

| | | |
|---|---|---|
| रामणीयकम् | - | रमणीयस्य भावः। |
| शशिमणिनिष्यन्दम् | - | शशिमणेः निष्यन्दम्। |
| अम्बरश्रियाः | - | अम्बरस्य श्रीः अम्बरश्रीः तस्याः। |
| हिरण्यवाहनामानम् | - | हिरण्यवाहः इति नाम यस्य तम्। |
| महानदम् | - | महान् च असौ नदश्च महानदः, तम्। |

**अलङ्काराः। -**

**उत्प्रेक्षालङ्कारः।**

*संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना।*

वस्तूत्प्रेक्षा, हेतूत्प्रेक्षा, फलोत्प्रेक्षा चेति उत्प्रेक्षा त्रिधा।

**उपमालङ्कारः।**

*उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।*

हंसीव कृष्ण! ते कीर्तिः स्वर्गङ्गामवगाहते।।

**मालोपमा।**

यत्र माला इव उपमालङ्कारः श्रृङ्खलितरूपेण दृश्यते तत्र मालोपमा।

## रूपकम्

" विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् " इति लक्षणम्।

# व्याकरणकार्यम्।

## विसर्गसन्धिः।

01 **पुनर् + च - पुनः च।**

खरवसानयोर्विसर्जनीयः ८/३/१५

खरि अवसाने च पदान्तरेफस्य विसर्गः।

टिप्पणिः- खर् ख फ छ ठ थ च ट त क प श ष स एते वर्णाः

यथा -

रामर् +तिष्ठति - रामः+ तिष्ठति।

रामर् + च - रामः + च ।

02 **नमस्ते - नमः +ते।**

अत्र तकारे परे विसर्गस्य सकारादेशः भवति।

विसर्जनीयस्य सः ८/३/३४

खरि परे विसर्जनीयस्य सः आदेशः।

यथा - इतः + ततः - इतस्ततः।

बालः + तु - बालस्तु।

03 **रामः + शेते - रामश्शेते।**

मनः+ शक्ति - मनश्शक्ति।

**वा शरि ८/३/३६**

**शरि विसर्गस्य विसर्गो वा।**

यथा -

हरिः + शेते - हरिश्शेते।

नमः + शिवाय - नमश्शिवाय।

मनः + सुखं - मनस्सुखं।

04 **हरिस् + रम्यः - हरिर् रम्यः।**

अत्र पदान्तस्य सकारस्य रेफे परे रेफादेशः भवति।

**ससजुषो रुः ८/२/६६**

**पदान्तस्य सस्य सजुषश्च रुः स्यात्।**

यथा -

रामस् - रामर् - विसर्गे रामः।

हरिस् - हरिर् - विसर्गे हरिः ।

05 **पितुर् + रूपम् - पितु रूपम्**

**रो रि ८/३/१४**

**रेफस्य रेफे परे लोपः स्यात्।**

यथा -

हरिर् +रम्यः - हरि रम्यः।

स्वर् + राज्यम् - स्वराज्यम्।

06 **पितु + रूपम् - पितू रूपम्**

**ढ्रलोपे पूर्वस्य दीर्घोऽणः ६/३/१११**

**ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः स्यात्।**

यथा-

| | | |
|---|---|---|
| हरि +रम्यः | - | हरी रम्यः। |
| शम्भु + राजते | - | शम्भू राजते। |
| स्व +राज्यम् | - | स्वाराज्यम्। |

07 **अतर् + अयम्।- अत + उ + अयम्।**

**अतो रोरप्लुतादप्लुते ६/१/११३**

**अप्लुतादतः परस्य रोः उः स्यात् अप्लुते अति परे।**

यथा-

अतोऽयम् - अतस् +अयम् ।
अतर् +अयम् । - ससजुषो रुः।
अत +उ +अयम् ।- अतो रोरप्लुतादप्लुते।
अतो +अयम् । -आद्गुणः।
अतोऽयम्। - एङः पदान्तादति।

एवं शिवोऽर्च्यः, रामोऽगच्छत्, निकटस्थोऽस्य इत्यादयः।

08 **कृष्णर् + वन्द्यः।**
**कृष्ण उ वन्द्यः।**

**हशि च ६/१/११४**

**अप्लुतादतः परस्य रोः उः स्यात् हशि परे।**

टिप्पणिः - सकारस्थानिकस्य रेफस्यैव उत्वम्, न तु स्वतःसिद्धस्य।

यथा - शिवस् वन्द्यः।

| | |
|---|---|
| शिवर् वन्द्यः। | ससजुषो रुः। |
| शिव उ वन्द्यः। | हशि च। |
| शिवो वन्द्यः। | आद्गुणः। |

एवं कृष्णो वन्द्यः इति रूपम्।

# पठनप्रवर्तनानि।



**पाठभागं कक्ष्यायां उच्चैः वाचयतु।**

**श्रद्धेयौ अंशौ-**

उच्चारणशुद्धिः।

आशयव्यक्तता।



**पाठभागं संघे चर्चित्वा उपमालङ्कारयुक्तानि वाक्यानि चित्वा लिखतु।**

यथा - हारम् इव - उपमा

**श्रद्धेयाः अंशाः**

उपमालङ्कारस्य ज्ञानम्।

चयनसामर्थ्यम्।

चर्चायां भागभागित्वम्।



**पाठभागं पठित्वा शोणनदवर्णनं स्ववाक्यैः लिखतु।**

**श्रद्धेयाः अंशाः**

आशयस्वांशीकरणम्।

उचितभाषाप्रयोगः।

सुव्यक्तलेखनम्।



**अनुबन्धं पठित्वा संस्कृतगद्यसाहित्यं गद्यसाहित्यकारांश्च अधिकृत्य लघूपन्यासं लिखतु।**

**श्रद्धेयाः अंशाः**

अनुबन्धस्य वाचनम्।

सङ्घचर्चा।

उपन्यासलेखनम्।

**सूत्रानुसारं प्रक्रियां विशदयतु**

| | |
|---|---|
| खरवसानयोर्विसर्जनीयः। | विसर्जनीयस्य सः। |
| ससजुषो रुः। | रो रि। |
| हशि च। | वा शरि। |
| ढ्रलोपे पूर्वस्य दीर्घोऽणः। | अतो रोरप्लुतादप्लुते। |

**क) रामस् - रामर्- रामः। ख) नमः + ते - नमस्ते।**

**ग) अतस् + अयम् , अतर् + अयम्. अत + उ + अयम्, अतो + अयम्, अतोऽयम्।**

**घ) शिवस् + वन्द्यः , शिवर् + वन्द्यः, शिव + उ + वन्द्यः, शिवो वन्द्यः।**

**ङ) स्वर् + राज्यम्, स्व + राज्यम्, स्वा राज्यम् ।**

**च) हरिः + शेते - हरिश्शेते।**

**छ) अत +उ +अयम्।**

**' शोणनदी स्वच्छशिशिरसुरसवारिपूर्णा भवति'। अधुना अस्माकं नदीनामवस्था कीदृशीति विषये कक्ष्यायां चर्चित्वा परिहारोपायान् निर्दिशतु। उद्बोधनाय भित्तिपत्रं निर्मातु।**

**श्रद्धेयाः अंशाः -**

कक्ष्यायां चर्चा।

परिहारनिर्देशाः।

उद्बोधनप्रवर्तनेषु भागभागित्वम्।

**HB साहाय्येन कक्ष्यायां चर्चित्वा सूत्रार्थविचारस्पर्धा कक्ष्यायां प्रचालयतु, टिप्पणीं च लिखतु।**

**सूत्राणि**

क) भोभगोअघोऽपूर्वस्य योऽशि।

ख) हलि सर्वेषाम्।

ग) एतत्तदोः सुलोपोऽकोरनञ्समासे हलि।

**श्रद्धेयाः अंशाः -**

निर्दिष्टभागानां वाचनम् अवधारणं च।

सङ्घे स्थित्वा सूत्रार्थविचारस्पर्धा।

टिप्पणीलेखनम्।

## अनुबन्धः।

### टिप्पणिः।

#### 1. बाणभट्टः।

संस्कृतसाहित्ये प्रमुखः प्रसिद्धः च गद्यकारः भवति बाणभट्टः। तस्य हर्षचरितं कादम्बरी चेति गद्यकाव्यद्वयं लभ्यते। कविरसौ कन्याकुब्जराजस्य हर्षवर्धनस्य सभापण्डितः आसीदिति श्रूयते। तस्य उभावपि ग्रन्थावपूर्णावेव दृश्येते। तस्य हर्षचरितं नाम आख्यायिका अष्टसु उच्छ्वासेषु विभक्तास्ति। श्रीहर्षस्य वंशवर्णनमेव अस्य ग्रन्थस्य प्रतिपाद्यविषयः। कादम्बरीनाम कथैव कवेरस्य सर्वोत्कृष्टा कृतिः।अस्याः कथायाः बीजं बृहत्कथातः गृहीतमस्ति। कवेः प्रतिभया सुन्दरकल्पनया च महत्तरा भवतीयं कथा । चण्डीशतकम् इति स्तोत्रकाव्यं च अनेन विरचितम्।

#### 2. गद्यकाराः कृतयश्च।

| गद्यकाराः | कृतयः |
|---|---|
| बाणभट्टः | हर्षचरितम्, कादम्बरी, चण्डीशतकम् |
| दण्डी | दशकुमारचरितम्, अवन्तिसुन्दरीकथा |
| सुबन्धुः | वासवदत्ता |

## 3. गद्यसाहित्यम्।

संस्कृतसाहित्यम् अतिविपुलम्, अत्युत्कृष्टं च भवति। पद्य-गद्य-मिश्ररूपेण त्रिधा विभक्तमिदम्। तत्र गद्यसाहित्यं विरलमपि सुन्दरं भवति।गद्यं कवीनां निकषं वदन्ति इति प्रथास्ति। 'अपाद: पदसंघातो गद्यम्' इति दण्डिना गद्यस्वरूपम् उक्तम्। गद्यकाव्यं कथा आख्यायिका चेति द्विविधम्। तत्र कथा कविकल्पितेन कथावस्तुना कथापात्रैः च भासते। कथा स्वयं नायकेन अन्येन वा कथिता भवति। आख्यायिका तु ऐतिहासिकैः इतिवृत्तैः निर्मिता। आख्यायिका स्वयं कविना वर्णिता भवति। सुबन्धुः, दण्डी, बाणभट्टः इत्येते प्रमुखाः गद्यसाहित्यकाराः भवन्ति। तेषु गद्यलेखकेषु महाकविः बाणभट्टः प्रातःस्मरणीयः भवति।'बाणोच्छिष्टं जगत्सर्वम्', 'वाणी बाणो बभूव ह ' इति प्रथे प्रसिद्धे।

### शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | आङ्गलेयम् |
|---|---|---|---|
| वरुणः | जलाधिपः | വരുണൻ | Deity of Oceans |
| हारः | माला | മാല | Garland |
| निःसृतः | निर्गतः | പുറത്തേക്ക് ഒഴുകിയ | Drained out |
| निर्झरः | प्रवाहः | പ്രവാഹം | Flow |
| कर्पूरद्रुमद्रवः | कर्पूरवृक्षद्रवः | കർപ്പൂരവൃക്ഷത്തിന്റെ -കറ | Stain of- - Camphor tree |
| प्रवाहः | धारा | ഒഴുക്ക് | Flow |
| लावण्यम् | चारुता | സൗന്ദര്യം | Beauty |
| प्रस्रवणः | प्रवाहः | പ്രവാഹം | Flow |
| अम्बरश्रीः | आकाशलक्ष्मीः | ആകാശലക്ഷ്മി | Charm/Beauty of Sky |
| शयनम् | शय्या | കിടക്ക | Bed |
| शिशिरम् | शीतम् | തണുത്ത | Cool |

| | | | |
|---|---|---|---|
| सुरसं | सुस्वादु | സ്വാദുള്ള | Tasty |
| वारि | जलम् | വെള്ളം | Water |
| पूर्णम् | निभृतम् | നിറഞ്ഞ | Filled up with |
| अपत्यम् | सन्तानम् | മകൻ /മകൾ | Offspring |
| दृष्ट्वा | विलोक्य | കണ്ടിട്ട് | Having seen |
| वासः | निवासः | താമസസ്ഥലം | Residence |
| अरचयत् | रचयामास | നിർമ്മിച്ചു | Made |

## किमधिगतम्।

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये यत्नः करणीयः |
|---|---|---|---|
| पाठभागस्य वाचनम्। | | | |
| उपमालङ्कारयुक्तपदानां चयनम्। | | | |
| शोणनदवर्णनं स्ववाक्यैः लेखनम्। | | | |
| लघूपन्यासरचना। | | | |
| सूत्रानुसारं प्रक्रियालेखनम्। | | | |
| नदीनामवस्थामधिकृत्य चर्चा, भित्तिपत्रनिर्माणं च। | | | |
| सूत्रार्थविचारस्पर्धा टिप्पणीलेखनं च। | | | |

काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते ।
अलङ्कारस्य चमत्कारत्वं कथमिति पश्यामः।

## पाठः- ६

# चमत्कृतिः।




### पाठप्रवेशः

चर्चासूचकाः-

पुष्पाणां सादृश्यम्।

वर्णवैचित्र्यम्।

अलङ्कारः वर्तते वा।

## आमुखम्

वार्तामाध्यमाः विभिन्नप्रकारेण जनान् आकर्षन्ति। रूपकल्पना, चित्रवैविध्यं, भाषाशैली च तत्र प्रमुखस्थानम् आवहन्ति। एवम् अलङ्काराः काव्यस्य शोभां वर्धयितुम् सहायकाः भवन्ति। अलङ्कारपठनेन काव्यास्वादनं यथाविधि कर्तुं शक्यते। तदेवमुक्तं आचार्यदण्डिना काव्यादर्शे ' काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते ' इति। अलङ्क्रियते अनेन इति अलङ्कारः।अथवा अलङ्करोति इति अलङ्कारः।अलङ्कारः द्विविधः शब्दालङ्कारः, अर्थालङ्कारः इति। अस्मिन् पाठे काव्यार्थापत्तिः, रूपकम्, इति द्वौ अलङ्कारौ निवेशितौ।

**( ग्रन्थालये प्रवृत्तं किञ्चन सम्भाषणम्)**

छात्रेषु एकः - मित्राणि! पश्यन्तु वार्ताम्।

अपरः छात्रः - का वार्ता ?

छात्रेषु एकः - घोरारण्ये जलोपप्लवेन गजः रभसा अन्यत्र नीतः।

अपरः छात्रः - अहो तर्हि अन्येषाम् अवस्था कीदृशी स्यात् ?

छात्रेषु एकः - अन्येषाम् अवस्था किमुत वक्तव्या ?

अत्र पत्रवार्तायां कैमुतिकन्यायेन अर्थसंसिद्धिः जायते। गजः जलोपप्लवेन रभसा अन्यत्र नीतः इति कथनेन अन्येषां जीवजालानाम् अवस्था न पृथक् बोधनीया इति भावः। उदाहरणान्तरं पश्यन्तु। 'सुनामि' नाम प्रकृतिक्षोभे बृहत्तरङ्गैः महासौधानि विनष्टानि इति वाक्यात् तटे स्थितानां कुटीराणामवस्था न पृथक् सूचनीया इति सिद्यति। अत्र कैमुत्येनार्थसंसिद्धिः - कैमुत्यम् - किमुत इत्यस्य भावः। काव्येषु तादृशाः अलङ्कारप्रयोगाः सन्ति।



**उदा- स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम् ?।**

स सुन्दरत्वेन आह्लादकारित्वेन च प्रसिद्धः पद्मजेता इन्दुः तव मुखेन जितः। (एवं स्थिते) सरसीरुहां पद्मानां का वार्ता? का कथा? अत्र येन मुखेन पद्मजेता इन्दुः जितः तेन पद्मानि जितानीति किं वक्तव्यम् ? इति दण्डापूपिकान्यायेन पद्मजयरूपार्थस्य संसिद्धेः अर्थापत्त्यलङ्कारः।

**लक्षणम् - कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते।**

किमुत इत्यस्य भावः कैमुत्यम्। कैमुत्येन कैमुतिकन्यायेन अर्थसंसिद्धिः विवक्षितार्थसिद्धिः काव्यार्थापत्तिः।



| | | |
|---|---|---|
| एकः छात्रः | - | चित्रं पश्यन्तु । |
| अपरः | - | पश्यामि । अत्र मातुः वचनं पश्यति वा ? |
| एकः छात्रः | - | आम् , सूर्योदये कमलं विकसति । पुत्रस्य मुखम् इदानीमपि न विकसति इति माता वदति। |
| अपरः | - | मुखकमलं वा ! |
| एकः छात्रः | - | आम् । मुखम् एव कमलम् इति मातुः विवक्षा। |
| अपरः | - | अत्र तयोः भेदो नास्ति किल? |
| एकः छात्रः | - | आम् । भेदः अस्त्येव। तथापि यत्र अभेदकल्पना तत्र रूपकालङ्कारः इति कथ्यते। रूपकालङ्कारस्य लक्षणं स्मरन्ति किल । |
| छात्राः सर्वे | - | आम्। |

**रूपकालङ्कारः ।**

**"विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्"- तत् रूपकम्।।**

अन्वयः- विषयस्य यत् विषय्यभेदताद्रूप्यरञ्जनं तत् रूपकम् इति।

( विषयी अभेदताद्रूप्यरञ्जनम् - विषय्यभेदताद्रूप्यरञ्जनम्)

अर्थः - विषयिणा - उपमानेन, विषयस्य -उपमेयस्य, अभेदरञ्जनं ताद्रूप्यरञ्जनं च रूपकम् -न भेदः इत्यभेदः, तस्य रूपं तद्रूपं, तस्य भावः ताद्रूप्यम्। एवं रूपकं द्विविधं- अभेदरूपकं , ताद्रूप्यरूपकं च इति।

अनेकविधेषु रूपकेषु द्विविधं रूपकमेवात्र परामृश्यते। अभेदरूपकं ताद्रूप्यरूपकञ्चेति। उपमानोपमेयोः मध्ये धर्मसाधर्म्यात् अभेदकल्पनम्। ( भेदो नास्तीति कथनम्) अभेदरूपकं भवति। (टिप्पणिः - पू पुरौ पुरः)

**अभेदरूपकम्।**

**उदा - अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्।**

**अन्वयः -** अयं साक्षात् धूर्जटिः हि येन पुरः क्षणात् दग्धाः ।

**आशयः -** अयं - पुरोवर्ती राजा, साक्षात् धूर्जटिः- प्रत्यक्षः शिवः, येन - राज्ञा, पुरः- शत्रुनगराणि, क्षणाद् दग्धानि - भस्मीकृतानि (राजपक्षे शत्रुनगराणि, शिवपक्षे त्रिपुरनगराणि इति)। अत्र शिवराजयोः पुरदहनरूपसाधर्म्यादभेदो वर्णित इति अभेदरूपकालङ्कारः।

**तादूप्यरूपकम्।**

**उदा - अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना।**

तादूप्यरूपकञ्च उपमानोपमेययोः मिथः धर्मसाधर्म्यात् एकेनैव (उपमानेन वा उपमेयेन वा) प्रयोजने सिद्धे अन्यस्य (उपमानस्य वा उपमेयस्य वा) आवश्यकता न भवति इति कथनम्।

**अन्वयः -** अस्याः मुखेन्दुना नेत्रानन्दे लब्धे इन्दुना किम् ?

**आशयः -** अस्याः सुन्दर्याः मुखेन्दुना नेत्रानन्दे लब्धे (सति) चन्द्रेण किं प्रयोजनम् ? अत्र मुखे चन्द्रत्वारोपः । नेत्रानन्दप्रदत्वरूपधर्मसाधर्म्यात् मुखेन्दुनैव प्रयोजने लब्धे इन्दुः न आवश्यकः इति मुखेन्दोः इन्दुताद्रूप्यं वर्ण्यते। अतः अत्र ताद्रूप्यरूपकम्।

## पठनप्रवर्तनानि।

### उदाहरणं पठित्वा अलङ्कारान् विविच्य लक्षणसमन्वयपूर्वकं समर्थयतु।

**क)** स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम्?।

**ख)** अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्।

**ग)** अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ?।

**श्रद्धेयाः अंशाः-**

उदाहरणस्य अपग्रथनम्।

अलङ्कारविवेचनम्।

लक्षणसमन्वयः।



**अनुबन्धं पठित्वा कक्ष्यायां चर्चित्वा आशयं वदतु, टिप्पणीं च लिखतु।**

क) पूर्णे कालेऽथ ............. भरतं तथा।।

ख) विललाप स .............कथा शरीरिणाम्।।

**श्रद्धेयाः अंशाः -**

पद्यस्य आशयस्वांशीकरणम्।

अलङ्कारनिर्णयः।

लक्षणसमन्वयः।



**प्रदत्तां घटनां पठित्वा अलङ्कारः कः इति निर्णीय समर्थयतु।**

एकस्मिन् दण्डे बहवः अपूपाः बद्धाः आसन्। कश्चित् मूषकः आगत्य तं दण्डं पूर्णतया खादितवान्। यदि मूषिकः दण्डं खादति तर्हि सः दण्डे ग्रथितान् अपूपान् अपि अखादत् इति प्रत्येकं न वक्तव्यम्।

**श्रद्धेयौ अंशौ -**

कथांशस्य अपग्रथनम्।

समर्थनम्।

## अनुबन्धः ।

| | |
|---|---|
| क) पूर्णे कालेऽथ कौसल्या<br>सज्जनाम्भोजभास्करम्।<br>अजीजनद्रामचन्द्रं<br>कैकेयी भरतं तथा।। | **आशयः-** अत्र पूर्णे काले (गर्भकाले समाप्ते) कौसल्या सज्जनाम्भोजभास्करं रामचन्द्रम् अजीजनत्। तथा कैकेयी भरतं च। सज्जनाः एव अम्भोजानि इति सज्जनाम्भोजयोः अभेदकल्पनम्। |

*(श्रीरामोदन्तम् - बालकाण्डम् -26)*

**ख)** विललाप स बाष्पगद्गदं
सहजामप्यपहाय धीरताम्।
अभितप्तमयोऽपि मार्दवं
भजते कैव कथा शरीरिणाम्। *(रघुवंशम् - अजविलापः-8-46)*

**आशयः-** स्वपत्न्याः इन्दुमत्याः वियोगेन शोकार्तः महाराजः अजः नैसर्गिकं स्थैर्यं त्यक्त्वा सगद्गदं रुरोद । अत्र अभिसन्तप्तः लोहः अपि द्रवत्वं प्राप्नोति इति स्थिते सन्तप्तस्य मानवस्य अवस्था का इति पृथक् न वक्तव्या इति आशयः।

**टिप्पणिः** - अभितप्तं - अतिसन्तप्तं, अयः - लोहखण्डम्, अपि मार्दवं - मृदुत्वं, भजते - प्राप्नोति। शरीरिषु - देहिषु (अभिसंतप्तेषु इति भावः), कथा - अवस्था, का एव - किं वक्तव्यम् इति भावः।

## किमधिगतम्।

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः करणीयः |
|---|---|---|---|
| अलङ्काराणां समर्थनम्। | | | |
| आशयप्रकाशनं टिप्पणीलेखनं च। | | | |
| घटनां पठित्वा अलङ्कारनिर्णयः समर्थनं च। | | | |

**यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो**
**भासो हासो कविकुलगुरुः कालिदासो विलासः।**
**हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः**
**केषां नैषा कथय कविता कामिनी कौतुकाय।।** (प्रसन्नराघवम् 1-22)

# ഭാരതത്തിന്റെ ഭരണഘടന

ഭാഗം IV ക

## മൗലിക കർത്തവ്യങ്ങൾ

**51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ് :**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയസേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക. സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സമ്മിശ്രസംസ്കാരത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക;

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

# കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹികനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മീഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണ്ണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപൽക്കരമായ ജോലികളിൽനിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽനിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

## നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.


*ബന്ധപ്പെടേണ്ട വിലാസം:*

**കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ**

ശ്രീ ഗണേഷ്, റ്റി.സി. 14/2036, വാൻറോസ് ജംങ്ഷൻ,
കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം – 34
ഫോൺ 0471 – 2326603
ഇ- മെയിൽ childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in
വെബ്സൈറ്റ് : www.kescpcr.kerala.gov.in


ചൈൽഡ് ഹെൽപ്പ് ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ – 1800 425 1400
കേരള പൊലീസ് ഹെൽപ്പ് ലൈൻ - 0471 – 3243000/44000/45000

*online **R.T.E Monitoring : www.nireekshana.org.in***